CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

Coll. No. 502

Title Trimśad-śloki vivrutti

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 802 Subject: Dharmasastra.

Title: Trimśat-slokokta vivritti

Author: Raghunātha Bhatta. Scribe: Kāmeśvara Śukla.

Date of the work: - Date of the Ms.: V.S. 2502

Place of the work: - Place of the Ms.: -

Size: 9.8" by 4.9" Extent: 76 foll.

Language: Sanskrit Script: Devanagari

Remarks: ——

श्रीगणेशाय नमः ॥ प्रणम्य रामं हेरंबं पितृव्यं पितरौ तथा ॥ रघुनाथः प्रकु
रुते त्रिंशत् श्लोकविवेचनं ॥१॥ निमित्तभेदभिन्नाऽशौचप्रतिपादनेन केन
चित्क्रमेणाऽवश्यं कर्तव्ये स्मृति द्वैकरूप तदभावादस्तु क्रमं मनुसृत्य गर्
भपाताशौचं तावदाह ॥ ॥ षण्मासाभ्यंतरे षु स्वपुरुषनिहितगर्भ
मात्रे विनष्टे माता तात माससंख्यासमदिनमशुचिः ॥ ॥ गर्भग्रहणादारभ्य ष
ण्मास समाप्तिं यावत् परिगलितं तेन भवेत्तत्र गर्भे पतिते माता तावद्गर्भपात
माससमसंख्यान्यहोरात्राण्यशुचिः स्यात् ॥ चतुर्थे चत्वारि ॥ पंचमे पंच ॥ षष्ठे ष
डित्यर्थः ॥ ननु आद्यमासत्रये तु नेदं किंतु त्रिरात्रमविशेषेण ॥ गर्भस्रावे यथामास ॥१॥
मचिरे तूत्तमे त्र्यहमिति मरीचिस्मरणात् ॥ अचिरे आद्यमासत्रये ॥ उत्तमे प्रागुक्त
णेन चचिरपदस्याऽद्यमासत्रयपरत्वे किं बीजमिति चेत् । तत्राह ॥ षण्मासाभ्यं
तरे यावद्गर्भस्रावो भवेद्यदा । तदा माससमैस्तासां दिवसैः शुद्धिरिष्यते इति तद्वाक्ये

त्रि २

विहितस्य षष्ठमासं यावत् माससमदिवसाशौचस्य तदंतःपातिस्रावविषये ण
निरवकाशे न स्रावे मातुस्त्रिरात्रं स्यादित्येतद्वाक्यविहितेन त्रिरात्राशौचेन बा
धात्स्रावविषयत्वं यद्यपि प्रतीयते ॥ तथापि दिवसैरिति बहुवचनाऽनुरोधात्
त्रिरात्राशौचस्यैवाद्यमासत्रय विषयत्वं युक्तं न चतुर्थमासमात्रं । द्वितीयमात्रं
तदुभयमेव वा तस्य विषयो युक्तः । प्रथमे त्रिरात्रं । द्वितीये द्विरात्रमित्यनौ विस
त्प्रथमपक्षासंभवात् । अचिरशब्दाऽनुरोधात् लिंगि समवायन्यायेन गौण
त्वापत्तेः शब्दाऽनुरोधाच्च प्रथमविषयत्वावश्यंभावाद्द्वितीयाऽनुपपत्तेः । तृतीयविषय
त्वे विरोधाभावेन तत्परिग्रहे तदेकारणाभावात्तृतीयानुपपत्तेः । गर्भमाससम
रात्रीः संस्रावे गर्भस्य त्र्यहं वा तिगोतमोक्त पक्षद्वयस्य वचनांतराऽनुरोधात् ष
ण्मासमध्ये विषयस्य व्यवस्थासंभवे व्यवस्थैयोग्यावस्थाऽपेक्षायामचिर
शब्दौचित्यन्यायाऽनुगृहीतेन समं स्यादशुचितामदितिन्यायेन नाद्योत्तरमास

म

सपिंडानां च तथैवैकाहस्नानसत्वेन ३

त्रयोर्विषयत्वेन व्यवस्थायायुक्तत्वाच्च। स्वपुरुषानि[illegible]हि तयत्नाणमुक्त्र चरार्थं व्य
भिचारं गर्भस्य स्रवणे प्रसवेपि। पितृसान्निध्यसन्निधिव्यवस्थितत्रिरात्रैकरात्र
सत्वेनैतद्वृत्तं निर्गमे तु तेषामेवा[illegible]शौचाभावस्यैव विस्पष्टावगतत्वात्॥
मातुस्तु तत्रापि इदमेव विशेषाऽनुक्तेः। गर्भमात्र इत्यनुवादः॥ तदानीं तदवस्था
यामिति संप्राप्तत्वात्॥ ॥ स्नानशुद्धाः सपिंडाः॥ ॥ ७ ॥ सपिंडाद्याः पित्रा
द्याः स्नानशुद्धाः सूतिकासवच्छिन्नाशौचिनः पूर्वोक्ते विषये पंचमषष्ठौ वर्जे
यित्वा। तथा च स्मरणं॥ सद्यः शौचं सपिंडानां गर्भस्य पतने सतीति॥ अस्युवि
स्नानाचोऽशौचविधानानुपपत्तेर्निःकारणाशौचासंभवाच्च। सद्यः शौचं स्ना
नमात्राच्छुद्धिरित्यर्थः॥ यत्तु मरीचिवचनं॥ स्रावे मातुस्त्रिरात्रं स्यात्सपिंडाशौ ॥२॥
चवर्जनमिति। न सपिंडानां प्रकृतत्रिरात्राशौचानावाऽनुवादकं न तु सर्वेषां
णाशौचनिषेधकं॥ यदपि गर्भस्रावे मासतुल्या रात्रयः। स्त्रीणां स्नान

मात्रमेव। पुरुषस्येति तदपि मात्राशौचविधायकं। सत्पूर्ववाक्यप्राप्तमेव पितुः स्ना
नं त्वनुवदति न त्वितरेषां स्नानं निवर्तयति वाक्यभेदप्रसंगात्॥ यद्यप्येतद्वाक्य
पर्यालोचनया स्रावे मासममाशौचयोरेकविषयत्वं प्रतीयते। तथापि वाक्यांत
रबलाद्भिन्नविषयत्वं कल्प्यमानं न दोषमावहतीति॥ ॥ अंत्ये मासद्वये तु त्रिदिनम
शुचयः॥ ॥ षष्ठे मासेथांत्ये पंचमषष्ठाख्ये मासद्वये गर्भपाते सपिंडास्त्रिदिनम
शौचिनः स्युः॥ ॥ तथा च मरीचिः॥ पाते मातुर्यथामासं सपिंडानां दिनत्रयमिति॥ पा
तः पंचमषष्ठयोरिति च॥ ॥ अतः परं सूतिर्वस्यात्॥ ॥ अतः परं अंत्यमासद्वया
दूर्ध्वं। सप्तममासप्रभृति गर्भनिर्गमे प्रसूतेः सहैव प्रसवनिमित्तं दशाहादिवर्णभेदेन
स्यादिति वक्ष्यमाणमेव नेतव्यं तद्यथार्थमुक्तं। आर्हवतिः॥ तथा च सप्तमासाभ्यंतरे इ
त्येतदनंतरमतऊर्ध्वं स्वजात्युक्तं। तासां माशौचमिष्यते इति स्मरणं॥ अत्र तासां
ग्रहणमुपलक्षणं॥ अतऊर्ध्वं प्रसूतिः स्यादिति वाक्यात् सप्तमप्रभृति चाविकलां

नस्य जीवतो निर्गमे दर्शनात् तत्र च लोके प्रसवव्यवहारा[illegible]प्रभृति गर्भनिर्गमस्य प्रसवश
ब्दवाच्यत्वात्र सद्येभ्यः सर्वेषां दशाहाद्याशौचस्य । दशाहशौचमाशौचं सपिंडेषु विधीय
ते । जनने प्येवमेवस्यान्निपुणं शुद्धिमिच्छतामित्यादि[illegible]त्वात् ॥ चातुर्वर्ण्यस्य तुल्यं
वयसि नैव तिथ[illegible]शौचमात्रं ॥ ॥ गर्भग्रहणमत्र[illegible]स्य चैव यो न जन्मादि गर्भा
ष्टमादिवत् ॥ तथा च । गर्भग्रहणमासादारभ्य प्रसवपर्यंत प्रसवमारभ्योपनयनं
पर्यंतं चावस्थाविशेषपुरस्कारेण यदाशौचमभिहितं वक्ष्यमाणं च न तच्चतुर्वर्ण्या
नां तुल्यं भवति नोपनीतसपिंडमरणप्रसवाशौचवर्णने[illegible]मित्यर्थः । तद्वि
धायकवचनेषु वर्णविशेषानुपादानात् ॥ मातामहाद्याचार्याद्याशौचवत् ॥ तुल्यं वय ॥२॥
सि सर्वेषां मतिक्रांते तथैव चेति याज्ञवल्क्यवचनाच्च ॥ अत्रापि पूर्ववत्क्रमेव वयः ।
यज्ञान्याप प्राप्ताऽनुवादत्वेन वयोऽतिक्रांतग्रहणस्याऽनुपात्तवर्णविशेष सर्वाऽशौचो
पलक्षणत्वादुक्ताऽशौचे साधारण्यलाभः ॥ आचार्याद्याशौच साधारण्यसिद्ध्यर्थं

तस्याऽवश्यकत्वात् ॥ मूलेऽतु तदेव वपः ॥ एवमांजस्येन व्याख्यानसंभवे विभज्य
व्याख्यानमनुषंगाध्याहारापेक्षत्वादप व्याख्यानं ॥ १ ॥ ॥ जन्माशौचांतराले यदि शि
शुर्नरणं नालवद्ध्यूर्ध्वकाले निःप्राणो निःपतेद्वा जनेन जन्माशौचमस्येव कल्
त्वं ॥ अस्यार्थः ॥ ॥ जन्माशौचांतराले जनननिमित्ताशौचपरिच्छेद्याहोरात्रमध्ये ना
लच्छेदादूर्ध्वकाले नालच्छेदनानंतरं यदि जीवत उत्पन्नस्य शिशोर्नशनमुपरमः । निःप्रा
णो मृत एव वा निःपतेद् उत्पद्येत तदा विषयद्वये पि मातुः पित्रादीनां जनननिमित्तं जन्मनिमित्तं
जन्माशौचं तत्कृत्स्नं दशाहाद्येवास्ति न तु वक्ष्यमाणेन शावाशौचेन निवर्त्तत इत्यर्थः ॥ तथा च
हारीतः ॥ जातमृते मृतजाते वा सपिंडानां दशाहमिति ॥ जातमृत इति नालच्छेदादूर्ध्वं यावस्त्ना
च्छिद्यते नालं तावन्नाप्नोति सूतकं ॥ छिन्ने नाले ततः पश्चात्सूतकं तु विधीयत इति जैमिनिवचना
त् ॥ अस्य वचनस्यैतत्प्रकरणपाठान्मृत पूर्णशब्दाद्वाध्याहृत्य योजना ॥ ॥ प्राङ्नालनिःछेदना
द्वे निधनमुपागतस्तत्र्यहेणैव शुद्धिः सर्वेषां स्तनिकाया स्त्विहन्यसकृत्[illegible] ॥ ॥ जीवन्नुत्तत्रो
नालच्छेदनात् नालच्छेदात्प्राक् निधनमुपागतस्त [illegible] त्रहिः सर्वेषां पित्रादीनां त्र्यहेणै

वशुद्धिर्जननाशौचस्य ॥ सूतिकायामातुरस्तु इह वचनं तयोः कोपि विषये सकलकंदशा
हाद्येव जननाशौचं पूर्वविषयद्वयेऽन्यस्येवेत्यर्थः ॥ तथा तत्राह मनुः ॥ जीवन्जातो यदि
ततो मृतः सूतकमेवतु । सूतकं सकलं मातुः पित्रादीनां त्रिरात्रमिति ॥ ततो जननानंतरमेव
नालच्छेदादर्वागित्यर्थः ॥ प्रेतशुद्धिस्तु सद्यः ॥ ४ ॥ प्रेतशब्देनात्र निमित्तमाशौचं
लक्ष्यते ॥ तस्य शुद्धिर्निवृत्तिः सद्यः स्नानमात्रेणैव । त्रिष्वपि विषयेष्वित्यर्थः ॥ तथा च शंखः ॥
प्राङ्नामकरणात्सद्यः शौचमिति ॥ सद्यस्त्वं च स्नानकालावच्छिन्नमेव पूर्वोक्तयुक्ते विज्ञा
नेश्वरेण तथा व्याख्यानाच्च ॥ यत्तु । दशाहाभ्यंतरे बाले प्रमीते तस्य बांधवैः । शावाशौचं
न कर्तव्यं सूत्याशौचं विधीयत इति बृहन्मनुवचनं तत्पूर्णाशौचनिषेधपरं ॥ प्राङ्नामकर
णादित्यत्र जन्माशौचेऽप्याशौचोपलक्षणं ॥ आशौचांते नामकरणविधानात् ॥ अत ॥४॥
एव विष्णुवचनं ॥ अनिवृत्ते दशाहे तु पंचत्वं यदि गच्छति । सद्य एव विशुद्धिः स्यात्प्रेत
नोदकक्रियेति ॥ एतच्चानंतरं वक्ष्यमाणमपि जननजनितत्वविशेषणव्यावर्त्यप्रदर्शना

र्थमुक्तं ॥ ॥२॥ ॥ प्राङ्नामतः । परे तद् इति सर्वत्र संबध्यते गतार्थं ॥ ॥ अर्वाग्दशान्जननात्तो
ऽपरे तेऽग्निदग्धेऽदग्धे त्वत्रापि सद्यः ॥ नात्रिवर्षस्य कर्तव्या बांधवैरुदकक्रिया । जातदंत
स्य वा कुर्यान्नाम्नि वापि कृते सतीति । मनुवचने साहचर्यादुदकक्रियोपलक्षितस्य दाहस्या
पि नामकरणोत्तरकालं विकल्पितत्वान्नामकरणादूर्ध्वं दंतोत्पत्तेस्तत्कालाद्दंतजन्म
सप्तमे मासीत्युपनिबंधृदर्शनात्सप्तममासलक्षणादर्वाक्प्रेते मृते अग्निदग्धे सद्यः ॥
अहोरात्रमाशौचं । अदग्धे तु न केवलं पूर्वोक्त एव विषये अन्यत्रापि विषये सद्यः स्नानमात्रं
भवति ॥ तथा च यमः ॥ अदंतजाते तनये शिशौ गर्भच्युते तथा ॥ सपिंडानां तु सर्वेषां अहो
रात्रमशौचकमिति ॥ याज्ञवल्क्योऽपि ॥ ॥ आदंतजन्मनः सद्य इति ॥ अनयोश्चाकल्पयोर्व्यवस्था
पि स्मृत्यां । अदंतजाते वाऽप्रेते सद्य एव नास्याग्निसंस्कारो नोदकक्रियेति ॥ विष्णुवचनेऽग्नि
संस्कारनिषेधसाहचर्यात्सद्यः शौचस्य दाहविषयत्वे इतरस्य दाहविषयत्वं पारिशेष्या
दवगम्यते ॥ ॥ तदुपरि द्विवर्षमाप्यदंतश्चौलकस्य ये ॥ ॥ दंतजन्मनोपरि आचौलात् ॥

त्रिवर्षो यावज्जायते तावत्पर्यंतं तृतीयवर्षसमाप्तिं यावदित्यर्थः ॥ अग्निविधौ वा
ऽग्निसहः। तृतीयवर्षमभिव्याप्येत्यर्थः ॥ चौलस्यान्ये परे तु दग्धेऽप्यदग्धे वा दि
नमहोरात्रमाशौचं ॥ तथा च विष्णुः। दंतजाते त्वकृतचूडे त्वहोरात्रेण शुद्धिरिति ॥ इ
दं च दंतजननोर्ध्वं दाहेप्यहोरात्राशौचं वाऽभिधानं मितावलानुसारेण ॥ मम तु प्रति
भाति। कृतनामद्विवर्षश्चेत् गर्भपतने वा सापिंडानां त्रिरात्रमिति। वसिष्ठोक्तत्रिरात्र
स्यं विषयकल्पकत्रिरात्रस्य च व्यवस्थापेक्षायां। यद्यप्यकृतचूडो वै जातदंतस्तु संस्थितः।
दाहयित्वा तथाप्येनमाशौचं त्र्यहमाचरेदित्यंगिरोवचनेनादाहेऽप्यहः। अदाहेत्वहरि
ति ॥ यत्तु ॥ वर्षत्रयादूर्ध्वं कुलधर्मापि कृत्या। कृतचूडो यस्तद्विषयत्वमंगिरोवचनस्याभि ॥५॥
धानयोजितोक्तं तदयुक्तं। जातदंतपदवैयर्थ्यापत्तेः। नहि पूर्णत्रिवर्षोप्यजातदंतः सं
भाव्यते। इदमेवाऽभिप्रेत्याशौचदशकादाविदमेवोक्तं। यत्तु। आचौलान्नैष्ठिका मी
स्मृतत्याद्वेकाऽग्रहणस्य कालोपलक्षणत्वात्तृतीयवर्षस्य वतत्कालत्वाद्दंतजनन

कालात्सप्तममासादूर्ध्वं वर्षद्वयाभ्यंतरे एकाह इति प्राच्योक्तं। तदुक्तं। कालोपलक्षणत्वात्
भावस्य वक्तव्यमानत्वात् ॥ तन्मतेऽपि यद्यपि श्लिष्टविज्ञं तन्न्यायात्तृतीयवर्षोपक्रमस्यैवा
वधित्वं प्राप्नोति। तथापि। विप्रे न्यूने त्रिभिर्वर्षैर्मृते शुद्धिस्तु नैशिकीत्यंगिरोवचन
बलान्नदंतस्यैवाऽवधित्वं युक्तं। यत्तु वसिष्ठवाक्ये कृतनामद्विवर्षग्रहणं तत्तस्य निखन
नपक्षस्य मुख्यत्वाद्दाहाभावेन त्रिरात्राशौचविधिद्वारा तस्यापि पाक्षिकदाहविधि
द्योतनार्थं ॥ अन्यथा तन्मते प्राप्तवर्ष्याति ... दप्यनवाप्तिकेऽर्वाक्प्रेतत्वमुपगच्छतीत्यापि
यमवचने एकाहविधौ तद्ग्रहणं। तदपि तस्य निखननमुख्यत्वद्योतनार्थं। तदितरस्य
च दाहमुख्यत्वद्योतनार्थमिति दिक् ॥ ॥ सर्वेषां तु त्रिरात्रं ॥ ॥ चूडाकर्म द्विजातीनां सर्वे
षामेव धर्मतः। प्रथमेऽब्दे तृतीये वा कर्तव्यं श्रुतिचोदनादिति। ततः संवत्सरे पूर्णे चूडाक
र्म विधीयते ॥ द्वितीये वा तृतीये वा कर्तव्यं स्मृतिदर्शनादिति च मनुयमवचनाभ्यां प्रथमा
ब्दावपि चूडाकरणस्योक्तत्वाद्दंतजननादूर्ध्वं सर्वेषां तु कृतचौले परे तु वर्णत्रयमध्येऽपि
त्रिरात्रं ॥ तथा च मनुः ॥ नृणामकृतचूडानामशुद्धिर्नैशिकी स्मृता। निर्वृत्तचूडकानां तु

त्रिरात्राच्छुद्धिरिष्यत इति ॥ नामकरणं तु नामकर्म तज्जननवन्नैकोपलक्षणं । तस्यानि
यतकालत्वेन कालविशेषस्योपलक्षयितुमशक्यत्वात् ॥ नवनामधेयं दशम्यां तु द्वाद
श्यां वापि कारयेत् । पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते । इति मनुवचनान्नामक
रणमप्यनियतकालमिति वाच्यं । तस्याशौचांतपरत्वात् ॥ तथा हि ॥ दशम्यां रात्रौ व्य
तीतायां ब्राह्मणः द्वादश्यामतीतायां क्षत्रियो नामधेयं कुर्यादित्युक्तं भवति । इदं चोपल
क्षणं वैश्यस्य षोडशे एकत्रिंशे च ॥ एवं सत्यनेन प्रकारेणाशौचांते नाम कुर्यादि
त्युक्तं भवति ॥ पुण्य इत्यादिस्तु [illegible] इति तस्यार्थः ॥ यद्वा ब्राह्मणं प्रत्येव एकादशी
दिने व्यतीपातादिमहादोषसंभवे द्वादशमनुकल्पत्वेन विधीयते । महादोषसत्वेन
मुख्यकालेपि [illegible] कर्म निषिद्धमनुक्तं गर्गेण । व्यतीपाते च संक्रांतौ ग्रहणे वैधृतावपि ॥ ६ ॥
श्राद्धं कुर्यात्प्रयत्नेन नैव प्राप्तकालेपि मानवः पूते । अन्यथा चापि ॥ समासंक्रांतिविष्ट्या
दौ प्राप्तकालेपि नाचरेदिति ॥ पुण्यतिथिपरत्वेन सर्वत्र नास्य व्याख्यानं न तांत
सकलगृह्यस्मृतिविरोधाद्व्याख्यानमेव ॥ यदपि [illegible] तिथिनावात्रि विशेष

णत्वात्स्त्रीलिंगौ दशमीद्वादशीशब्दौ वहोरात्रपरौ लक्ष्यावचनबलादाशौचमध्येपि जात
कर्मवन्नामकर्माप्यापद्यपक्षे कर्तव्यं । अध्याहारोपलक्षणत्वयोः प्रमाणाभावादित्युक्तं ।
तदप्ययुक्तं ॥ प्रमाणाभावासिद्धेः । आशौचव्यपगमे नामधेयं ॥ आशौचे व्यतिक्रां
ते नामकर्म विधीयते इत्यादि विष्णुशंखादिवचनसद्भावात् ॥ दशम्यामुत्थाप्य पिता
नामकर्म कुर्यादिति गृह्ये सूत्रस्य सूतिकोत्थानानंतरकालं विधानात् ॥ यच्च कैश्चित् धर्मेण
सत्यपि चूडाकरणस्य प्रथमवर्षादिकालत्वे । विप्रे न्यूने त्रिभिर्वर्षैर्मृते शुद्धिस्तु नैशिकी
त्यादि वाक्यैस्तृतीयवर्षात्पूर्वमहोरात्राशौचविधानात् चूडैकवाक्यतया तृतीयवर्षमेवाब्दि
काद्यैः [illegible] ते इत्यादिवचनेष्वपि गृह्यत इत्युक्तं तदप्ययुक्तं द्विवर्षे इत्यादि वसिष्ठादिवा
क्यैस्तत्रैव त्रिरात्रस्यापि विधानादयुक्तं । तृतीयाब्दे च संगतं [illegible] प्रथमं [illegible] मा
कुलधर्मापि [illegible] इति हारलतादिवचनं [illegible] चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः । प्रथमेऽब्दे तृती
ये वा कर्तव्यं श्रुतिचोदनात् [illegible] इत्यादि पूर्वकुलधर्मप्राप्तत्वेनैकदेशिनां
निर्देशादत्र किंचिदेव ॥ तस्मान्नामकर्मेदं तज्जननयोरेव कालोपलक्षणार्थं ॥ न तु चूडा

रणस्य ॥ एवमुपनयनस्यापि ॥ वचनं च लोके त्रिवर्षादूर्ध्वमित्यत ऊर्ध्वस्यापि त्र्यहमिति ॥
यस्तु वाचस्पतिनाथमवचनं संवत्सरे पूर्णे इत्येवं द्वितीयलोभात्पदानर्थक्यपरिहारार्थं
तत्र पूर्णे इत्यत्र पञ्चमतृतीयपदानर्थक्यपरिहारार्थं तस्य तृतीयवर्षान्तरमावयवपरत्वं
सर्वस्य तु तद्वाक्यवयवपरमिति व्याख्याकौशलं तेः सोऽकारप्रश्लेषाज्ञाननिबंधः ॥ ॥ त्रिदि
नमित्यत्र व्याख्यातात् ॥ ॥ तृतीयवर्षादूर्ध्वमाप्रतादुपनयनपर्यंतमित्यत्र तथापि कुलधर्मा
पेक्षया ततश्चौलोऽपि परे त्रिदिनं ॥ अत ऊर्ध्वं तु यावदुपनयनं सर्वदा त्रिरात्रमुक्तमेवातथा।
वां त्रिरात्रः ॥ यद्यप्यत ऊर्ध्वं जातदंतस्य मंत्र्छितः दाहयित्वा तथाप्येनमाशौचं त्र्यहमाचरे
दिति ॥ इदं वचनं त्रिवर्षान्यूनत्रिवर्षे तु मते श्रुद्धिस्तु त्रिरात्रेति तेनैवाऽभिहितत्वात् पूर्णे त्रिव
र्षेऽत ऊर्ध्वमिति विषयमिति। मिताक्षराकारैरस्मिन्नर्थे न व्याख्यातमूलं द्वितीयपक्षे पीदमेव मूलं ॥ ॥ ७१
नचैतस्मिन् पक्षे एतस्य वाक्यस्य त्रिवर्षात् त्रिवर्षेभ्यः विषयत्वे अत्र त्रिवर्षे यस्त्वाविषयस्य
मर्पकत्वाद्दाहविषयत्वेति विवक्षितं। त्रिवर्षे तु दाहस्य निःसत्वाद्विवक्षितमिति नैवैरूप्यं स्यादि
ति वाच्यं ॥ अत्र त्रिवर्षे विषयत्वे चास्मादूर्ध्वं पञ्चायेनाऽप्यस्यार्थस्यासिद्धेः ॥ ॥ आप्र
ताकृतास्य शौचं ॥ ॥ आप्रतादित्यपूर्वावधिसमर्पकत्वेनात्रापि संबध्यते ॥ मध्यमगतत्वे

नविशेषाय्यहणदपेक्षितत्वाच्च ॥ उपनयनात्त्र्यहमित्यत्र उपरमे ब्राह्मणत्वादिजातिनिमित्तं दशाहा
दिमाशौचं तत्सपिंडानां भवतीति वक्ष्यमाणमेव तैराकांक्ष्यार्थमुक्तं ॥ ॥ तथा च याज्ञवल्क्यः ॥
त्रिरात्रमव्रता देशाद्दशरात्रमतः परमिति ॥ दशरात्रमिति ज्ञात्या शौचोपलक्षणं ॥ आशौचमिस
त्र शौचशब्दस्य नञ्समासः। तेनोभयपदवृद्धिः ॥ अर्वाक्संस्कृतस्यात्र्याशौचस्य मातापि
त्रोरपि प्रसक्ताबाह ॥ मातापित्रोस्तु पुत्रे त्रिदिनमदशाहे ॥ ॥ नाम्नः प्रागकृतस्याशौचस्य
नापवादः ॥ किंच यदुक्तं तज्जातादृत्कृतस्यैवेति प्रदर्शनार्थमिदशान्ग्रहणं। नतु सदशानव्याप्त्यर्थं
तेन नामकरणादूर्ध्वं यावदुपनयनं पुत्रे अपत्ये परे तेषां यो वस्त्रादिविशेषाऽनाश्रये तो मा
तापित्रोस्त्रिदिनमाशौचं ॥ पुत्रग्रहणमुपलक्षणं ॥ नान्यानामकृतदंतानां त्रिरात्रेण शुद्धिः।
वैशिकादपि मं बंधादकृतं ध्यादचेत्यहमिति सामान्येन स्मरणात् ॥ प्रत्ताऽप्रत्तासु योषित्सु
संस्कृतासंस्कृतासु च ॥ मातापित्रोस्त्रिरात्रं स्यादितरेषां यथाविधीति शंखवचनं तत्र पत्सेऽपि
त्रिरात्रविधानाच्च। इदं च। अप्रत्तासु त्रिरात्रं दंतजननादुपरि। आकृतादंतास्तु पित्रोरेकरात्र
मिति काश्यपिनिवचनात् ॥ माधवीयविशेषः ॥ ॥ सन्निधौ नष्टचेष्टे ॥ ॥ सन्निधिशब्देना
त्र यत्रस्थे नाशौचं कालमध्ये श्रूयते स उच्यते ॥ तादृशसन्निधौ नष्टचेष्टे मृते सर्वेषांकेज्ञा

त्याशौचव्यतिरिक्तं सकलं मरणाशौचं भवति ॥ तत्र प्रथमादिनश्रवणे पूर्णं । तद्भिन्नाशौचदिन
मध्यश्रवणे तच्छेषः ॥ अतिक्रांते त्वाशौचकाले श्रवणे त्वाशौचवन्नास्तीत्यर्थः ॥ तथा
च व्याघ्रपात् ॥ उपनीते तु विषमं । तस्मिन्नेवातिकालकामिति ॥ वक्ष्यमाणदशाहाभ्यतीति
विशेषणेनात्वाद्यादिमरणवदनुपनीतमरणे प्यतिक्रांताशौचनिषेधः सिद्धे पि वक्ष्यमा
णः । नद्विवर्षविषयमातापितृसोदरदशाहपक्षे प्यनुपनीतापरमनिमित्तत्वादतिक्रांता
शौचं नास्तीति प्रदर्शनार्थमिदमुक्तं ॥ ॥३॥ ॥ ऊनद्विवर्षमुभयोः सूतकं मातुरेव हीत्यस्य
विज्ञानेश्वरकृतं प्रथमव्याख्यानमभिप्रेत्याह ॥ ७ ॥ ॥ ऊनद्व्यब्दे त्वसंस्कृते निर्गुणजननीसोद
राणां दशाहः ॥ ॥ योगीश्वरवाक्ये ऊनद्विवर्षग्रहणं दत्तान्यूनद्व्यब्दग्रहणं नास्मिन्पक्षे
न तु पूर्णद्विवर्षव्यावृत्त्यर्थं । तत्राशौचस्य संस्कृतरां तावत्त्वात् । तस्मिन्नकृतचूडे मृते जनिकरस्य पि ॥८॥
तृजनन्योः सोदराणां च दशाहमाशौचं ॥ इतरसपिंडानां तूक्तं ॥ इदं चापि त्रीणि जननादूर्ध्वमिव सो
दराणां तु नामकरणादूर्ध्वं वेदितव्यं ॥ तथा च पैठीनसिः ॥ गर्भस्थे प्रेते मातुर्दशाहं जाते उभयोः
सतो नाम्नि सोदराणां चेति ॥ तत्राशौचकालमध्ये सद्यः शौचप्रतिपादकैस्तदूर्ध्वं चा
ज्ञात्वादिप्रतिपादकैर्मन्वादिवाक्यैर्विरोधाद्धनोकोविदस्तान्नास्य पक्षस्यानिबंधकारैर्ना

दृतादराद् ऊनद्वि । वर्षपदद्वयेपर्यापत्तो यज्ञवल्क्यवचनस्य तत्परत्वेन व्याख्यानस्य स्फुतराम
युक्तत्वाद्द्वितीयव्याख्यानमभिप्रेत्याह ॥ ॥ यद्वास्पृश्यत्वमेवाऽधिकमिह विषये सूतकं त्रि
रात्रं ॥ ॥ इह विषये ऊनद्विवर्षे मृते पित्रोः अस्पृश्यत्वमितरस्य शौचयोग्यत्वमेवेतरसपिंडा
पेक्षया अधिकं ॥ अस्पृश्यत्वस्य चाबाधितं दूषयति अथानिधाने त्यादिना ॥ आशौचं क
र्मानधिकाररूपं पित्रोः त्रिरात्रं सोदराणां चेतरसपिंडवदेव न तु दशाहं ॥ एवं चापि चेतरस
पिंडानामूनद्व्यब्दे परमे अनुगमननियमवदास्पृश्यता किंतु पूर्णद्विवर्षे परमेव वक्ष्य
माणवधिकासनं तूक्तं भवति ॥ तथा च स्मृत्यंतरं ॥ ऊनद्विवर्षसंस्थिते उभयोरेव नेतरेषा
मिति । इदं च कर्मानधिकाररूपस्याशौचस्य विधिरास्पृश्यत्वादस्पृश्यत्वास्येव निषेधार्थः ॥ सू
तकं तु मातुरेव हीत्यस्यैव व्याख्यानाधिमितारूपाजीवनया विज्ञानेयोगिनो पीदमेव व्याख्यानमभि
प्रेतमिति प्रतिलक्ष्यते । अर्वाग्जिन्यादिनोक्तस्येतरसपिंडाशौचस्य क्वचिद्विषये अपवादमाह ॥ ॥ स्त्रीपु
त्रोनेन शुद्ध्येत् त्रिपुरुषविषये ज्ञातिरहितौर काल्यात् ॥ ॥ नामकरणादूर्ध्वं चूडाकालपर्यंतं अकृते
चौलास्तु स्त्रीपुत्रेतासु त्रिपुरुषविषये कूटस्थमारभ्य पुरुषत्रयपर्यंतं सपिंडः स्नानेन शुद्ध्येत् ॥ तथा
चापस्तंबः ॥ अकृतचूडायां तु कन्यायां सद्यः शौचं विधाय तद्धिति ॥ वसिष्ठोपि ॥ अप्रत्तानां स्त्रीणां त्रिपुरुष

विज्ञायत इति तृतीयवर्षपरं कालग्रहणमुत्तरार्थं तृतीयवर्षादूर्ध्वं कुलधर्मवशेन अकृतचूडा
यामप्यहोरात्रस्येष्टत्वात् । न तु सद्यःशौचप्रतिपादके वचने विवाके कालोपलक्षणप्रदर्शनपरे त
क्ष स्य पूर्वोक्तेरयुक्तत्वात् । प्रथमवर्षेऽकृतचूडायामपि सद्यःशौचप्रसंगाच्च ॥ तस्माद्वाग्दानादि
क्रियमाणे चोलपर्यंतं सद्यःशौचं ॥ तदूर्ध्वं यावद्वाग्दानमहोरात्रं ॥ तृतीयवर्षादूर्ध्वं त्वकृतचू
डायामपि यावद्वाग्दानमेव प्रथमपक्षेऽप्यहेव तु । त्रियामेकाहं इत्येतावद्विनिश्चितं ॥ ॥ अर्वाग्वाग्
दानतोक्ता ॥ ॥ चौलात्तृतीयवर्षाद्वोर्ध्वं वाग्दानं यावत्स्त्रीषु प्रेतासु त्रिपुरुषविषयो ज्ञातिरहोरा
त्रेण शुद्ध्येत् ॥ ॥ तथाच याज्ञवल्क्यः ॥ अहस्त्वदत्तकन्यासु बालेषु च विशोधनमिति ॥ इदं चाकृत
चूडायां सद्यःशौचविधानात्तदूर्ध्वं प्रविशेषेण वर्णानां वाक्संस्कारकर्मणः । त्रिरात्रात्तु भवेच्छुद्धिः
कन्यास्वह्नो विधीयत इत्युक्तं नित्ये वचने यत्र प्रथमपक्षेऽतु राज्ञं तत्र कन्यास्वहोरात्रविधानात्तृतीयव ॥२॥
र्षादूर्ध्वं च । कृतचूडायामपि प्रवर्त्तत इति निर्बंधस्थलामन्त्याभावो लक्ष्यते ॥ ॥ त्रिभिरूपयमना
दूर्ध्वं गोत्रं स्वकं च ॥ ॥ वाग्दानादूर्ध्वमुपयमनाद्विवाहादर्वाक्स्त्रीषु प्रेतासु भर्तृगोत्रं स्वकं पितृगो
त्रं च सप्तमपर्यंतं त्रिभिस्त्रिरहोभिः शुद्ध्येत् ॥ तथाच मरीचिः ॥ अवरि पूर्वं प्रेतासु यान्येव प्रतिपा वाग्प्र
दिता ॥ असंस्कृता तु स्वादौ पात्रिरात्रमुभयोः स्मृतमिति ॥ विवाहादूर्ध्वं तु वक्ष्यति ॥ ॥४॥ ॥ पंच
मवत्तमाह ॥ ॥ जन्मन्योपेतमृतावपि च दशनिशा द्वादशाहानि पक्षं मासं वर्णाः क्रमेण शुचयउचितं सं
३ मनुः ॥ स्त्रीणामसंस्कृतानां तु त्र्यहाच्छुध्यंति बांधवाः । यथोक्तेनैव कल्पेन शुध्यंति तु सनाभय इति ॥

दूरातिस्तुपरं ॥ ॥६॥ ॥ जन्मनि पूर्णप्रसवे उपेत एवोपेत उपनीतस्ते मृतावपि च उत्पन्नोऽपुनीतम
तसपिंडजनने च । विप्रवैश्यशूद्रवर्णाः क्रमेण दश । द्वादश । पंचदश । त्रिंशच्च दहोरात्रान्नेऽप्यशु
चयः स्युः ॥ कुचिततद्विजन्मशुश्रूषादिस्वधर्मानुष्ठानपरः शूद्रस्तु पक्षं । पंचदशरात्रमशुचिः स्यात् ॥
तथाच याज्ञवल्क्यः ॥ दशरात्रमतः परं । त्रिरात्रं दशरात्रं वा शावमाशौचमिष्यते ॥ क्षत्रस्य द्वादशा
हानि विशः पंचदशैव तु ॥ त्रिंशद्दिनानि शूद्रस्य तदर्धं न्यायवर्तिन इति । उपनयनस्य च जात्याशौ
चे पूर्वावधित्वं त्रैवर्णिकपुरुषविषयं ॥ स्त्रीशूद्रयोस्तु विवाहस्य पूर्वावधित्वं जात्याशौचे वयोनि
मित्ताशौचे चोत्तरावधित्वं द्रष्टव्यं । वैवाहिको विधिः स्त्रीणामौपनायिकः स्मृत इत्यस्योपनीत
पुरुषाधिकारिकधर्मेषु स्त्रीणां विवाहितानामधिकारप्रतिपादनार्थत्वात् ॥ ततो दत्तानामन्त्रे देव
हिः स्वजातस्य तु पक्षौ वं स्यान्मृतके जातके तथेति ॥ अत्र पुराणसमीयविशेषवचनाच्च ॥ स्त्रीशूद्रयोस्तु
समानधर्मत्वात् । बहुकालमविवाहितस्य शूद्रस्य षोडशवर्षादूर्ध्वं मासाशौचं ॥ अकृतोऽर्थः । स
उत्कर्षषोडशाद्वत्सरात्परं ॥ मृत्युं समधिगच्छेच्चेन्मासात्तस्यापि बांधवाः । शुद्धिं समधिगच्छंति तेना
त्रकार्यं विचारणेति शंखस्मरणात् ॥ असपिण्डस्य तो ॥ सद्यःशौचं तथैकाहस्त्र्यहश्चतुरहस्तथा ॥
षड्दश द्वादशाहश्च पक्षो मासस्तथैव च ॥ मरणांतं तथा चान्यद्दशपक्षास्तु सूतके ॥ इत्युपक्रम्य ॥
पंथोऽर्थतो विजानाति वेदमंगैः समन्वितं ॥ सकल्पं सरहस्यं च क्रियावांश्चेन्न सूतकं ॥ ॥ एकाहाद्ब्रा

लेण: शुध्येद्योग्निवेदसमन्वितः॥ हीने हीनतरे चैव त्र्यहश्चतुरहस्तथेत्यादिना एकाहाद्ब्राह्मणः शुध्ये
द्योग्निवेदसमन्वितः। त्र्यहात्केवलवेदस्तु द्विहीनो दशभिर्दिनैः॥ इत्यादिस्मृत्यंतरे च। ब्राह्म
णः क्षत्रियस्तु दशाहेन स्वकर्मनिरतः शुचिः। तथैव द्वादशाहेन वैश्यः शुद्धिमवाप्नुयात्॥
शूद्रो विंशतिरात्रेण शुध्यते मृतसूतके॥ त्रिंशद्दिनानि शूद्रस्य तदर्धं न्यायवर्तिन इत्यादिव
चनैश्च क्षत्रियवैश्यशूद्राणामपि उपाधिविशेषोपादानपुरःसरं संकुचिताशौचकल्पाः प्रति
पादिताः। सर्वेषामेव वर्णानां सूतके मृतके तथा। दशाहाच्छुद्धिरेतेषामिति शातातपोऽब्रवीत्॥
पंचदशरात्रेण राजन्यो विंशतिरात्रेण वैश्य इत्यादिवचनैश्च सामान्य एवाध्यायवाऽशौचकल्पाः
प्रदर्शिताः॥ तत्र व्यवस्थिताशौचकल्पप्रतिपादकानां तावदग्निवेदकार्याग्निहोत्रादिस्वाध्यायवि
षयता॥ द्रव्यार्जनं विना सीदत्कुटुंबाश्रयस्तनिकादिकर्तृकतदकरणे पापयोगित्वार्जनविषयता च वि
नश्यादित्यादिः प्रपंचेन प्रतिपादितैव॥ सामान्यतः प्रवृत्तानां तु॥ मनुयाज्ञवल्क्यादिमहास्मृतिवि ५१०॥
रोधाच्छिष्टसमाचाराभावाच्च॥ यद्यपि तैरनादरणीयत्वमेवोक्तं॥ तथापि मन्वाद्युक्तापि क्रियास्यकाला
शौचप्रतिपादकानां तावद्यस्य यावति काले येन विनाऽऽपत्स्यभावः स्यात्तद्विषयता स्वकालाशौचे
प्रतिपादकत्वेन सर्वतुल्यतैव॥ अत एव॥ दशाहं शावमाशौचं सपिंडेषु विधीयते॥ अर्वाक्संचयनाद
स्थ्नां त्र्यहमेकाहमेव चेति सामान्यप्रवृत्तमपि मनुवचनं कुसूलधान्यकोवास्यात्कुंभीधान्यक एव

वा॥ त्र्यैहिको वापि न भवेदश्वस्तनिक एवेति प्राक्प्रतिपादितचतुर्विधगृहस्थाभिप्रायमित्युक्तं॥ मि
ताक्षरायां॥ अधिककालाशौचप्रतिपादकानां तु जातिमात्रक्षत्रियादिविषयत्वेऽपि वक्तुं शक्य
मित्यादिरन्यत्र विस्तरः। सोदकविषयोऽप्यवधाशौचकल्पप्रतिपादकानामप्येषैव व्यवस्था॥ माधवस्तु
द्वादशाहदशाहादिसूनाशौचकल्पा युगांतरविषया॥ एतच्चाध्यायसमाप्ते सामग्रीसंकोचनं तथेति
स्मृत्यंतराद्दशाहएव विप्रस्य सपिंडमरणे सति॥ कल्यां तराणि कुर्वाणः कलौ भवति किल्बिषीति॥ हा
रीतवचनाद्दृश्यातां एतच्च ब्राह्मणादिग्रहणात्सजातीयविषयमेव। विजातीयेषु ब्राह्मणादेर्मूर्धावसिक्ता
दिषु तावदनंतरे षडहस्त्वेकांतरे त्र्यहो द्व्यंतरे एकरात्रं॥ तथा च हारीतेनोक्तं॥ दशाहाच्छुध्यते विप्रो ज
न्महानौ स्वयोनिषु॥ षड्भिस्त्रिभिरथैकेन क्षत्रविट्शूद्रयोनिष्विति॥ बौधायनेन तु स्वस्य ज्ञात्याशौ
चमेव। तत्रापीत्युक्तं। क्षत्रविट्शूद्रजातीया ये स्युर्विप्रस्य बांधवाः॥ तेषामशौचे विप्रस्य दशाहाच्छु
द्धिरिष्यत इति॥ अनयोश्चापरस्य योग्यतिमात्रस्वधर्मपरविषयत्वेनापदनापद्विषयत्वेन वा व्यवस्था॥ मू
र्धावसिक्तादिब्राह्मणादिषु ज्ञातमृतज्ञात्याशौचं द्रष्टव्यं॥ तथा च विष्णुः॥ ब्राह्मणस्य क्षत्रियविट्शूद्रेषु
सपिंडेषु षड्रात्रत्रिरात्रैकरात्रैः॥ क्षत्रियस्य विट्शूद्रयोः षड्रात्रत्रिरात्राभ्यां॥ वैश्यस्य शूद्रेषु सपिंडेषु षड्रात्रेण शुद्धिः॥
हीनवर्णानां तूत्कृष्टेषु सपिंडेषु जातेषु मृतेषु वा तदाशौचव्यपगमे शुद्धिरिति॥ मूर्धावसिक्तादीनां
सजातीयसपिंडेषु क्षत्रियादिज्ञात्याशौचं॥ ब्राह्मणात्क्षत्रियायामुत्पन्नः क्षत्रिय एव क्षत्रियावैश्या

यामुत्पन्नो वैश्य एव। वैश्यायां शूद्रायामुत्पन्नः शूद्र एव। तस्य मूर्धावसिक्तादीनां क्षत्रियादिधर्मलाभप्रतिपा
दनार्थत्वात्॥ सूतादि प्रतिलोमजानां प्रतिलोमा धर्महीना। इति स्मरणात् तदाशौचं नास्त्येव। केवलं मातृ
पुरोधोऽग्निविस्रंसनाय कर्तव्यत्वं शौचमात्रमिति विज्ञानेश्वराः। माधवाचार्यस्तु। यस्मिन्निमित्ते शूद्रस्य
यदाशौचं। तस्मिन्निमित्ते प्रतिलोमानां तदेव क्षौरं वा शौचे प्रकुर्वीत रजकादिवदुत्तमस्याप्यसा इति॥ ब्रह्मपुरा
णवचनादित्याह इत्याख्यं॥ तथा सत्यपि सपिण्डत्वे अनौरसेषु क्षेत्रजादिसुतेषूत्पन्नेषु वा क्लीबेऽनुलोमः
प्रतिलोमनिम्नान्याश्रितासु पत्नीषु सूतासु मृतासु च पूर्वापरस्य पत्योश्च त्रिदिनमाशौचं न तु दशाहादि॥ तथा
च त्रिरात्रेण शुद्ध्यन्ति इत्यनुवृत्तौ। विष्णुः॥ अनौरसेषु पुत्रेषु जातेषु च मृतेषु च॥ परपूर्वासु भार्यासु प्र
सूतासु मृतासु च॥ मि॰ अनौरसपदेन चात्रौरसो धर्मपत्नीज इति परत्वापितो रसान्निस्सरणं लो
तेषां क्षेत्रजादीनां जन्मादौ त्रिरात्रसिद्धिः॥ अत एव बृहस्पतिना। अन्याश्रितेषु दारेषु परपत्नीसुते
षु चेत्युक्तं॥ यस्त्वौरसादेव दानेन क्रयेण वाऽन्यस्य पुत्रीकृतस्तत्र पूर्वपितुर्न त्रिरात्रं पूर्वसंबंधनि ॥११॥
वृत्तेरन्यत्र दशाहादीनि प्राप्नोति॥ परपूर्वग्रहणं च यद्यपि द्वितीयपत्युरेव त्रिरात्रमिति प्रतीयते। तथा
पि भार्यस्यस्ये न्याश्रितग्रहणात् पूर्वस्यापि॥ पितृपत्नीसपिण्डानां एकरात्रं। तथा च मरीचिः॥ सूतकमृ
तकं चैव त्रिरात्रं परपूर्वयोः॥ एकाहस्तु सपिण्डानां त्रिरात्रं यत्र वै पितुरिति॥ पितृग्रहणं पत्युरप्युप
लं॥ हारीतोऽपि। परपूर्वासु भार्यासु पुत्रेषु कृतकेषु च। भर्तृपित्रोस्त्रिरात्रं स्यादेकाहस्तु स

पिण्डानामिति॥ याज्ञवल्क्येन तु। पित्रोः पत्योश्च एकाह उक्तः। अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु चेति॥
तस्य चासन्निहितविषयत्वं। निर्गुणविषयत्वं वा। त्रिरात्रैकरात्रयोः सर्वगुणसवर्णविषयत्वेन व्यवस्थे
त्यपि कश्चित्। एकाहपक्षे च सपिण्डानां स्नानमात्रं। एवं च अन्याश्रितेषु दारेषु परपत्नीसुतेषु च। गोत्रिणः
स्नानशुद्धास्तु त्रिरात्रेणैव तत्पितेति॥ प्रजापतिवचने समभिव्याहारात् पितृपुत्रपितृतत्सपिण्डत्रिरा
त्रस्नानयोस्तत्समानविषयत्वं यद्यपि प्रतीयते तथापि त्रिरात्रविषये सपिण्डानां॥ मरीचिहारीतव
चनाभ्यामेकाहविधानात् सामान्यतः समानविषयत्वांगीकरणे पूर्वोक्तोऽवान्तरविषयविभागः कल्पनी
यः। एवं च अघः शौचाद्यनुवृत्तौ अन्यपूर्वासु भार्यासु पुत्रेषु कृतकेषु चेति। शंखलिखितवचनमपि भार्या
पुत्रयोर्व्याघ्रः सन्निधिशब्दादुपस्थितयोः पतिपित्रोः सपिण्डानामित्यध्याहारेण सपिण्डविषयमेव व्या
ख्येयं॥ असवर्णजातीयभार्याऽशास्त्रीयपुत्रीविषयमित्यपि कश्चित्। निन्नपितृकस्योरस्य जातेए
काहः। मृते त्र्यहः॥ तथा मरीचिः॥ मातृकपाद्विपितृकौ भ्रातरावन्यगोचरौ। एकाहस्सूतके तत्र त्रिरात्रं
मृतके तयोरिति॥ ॥ वानप्रस्थे यतौ चोपरमति कुलजे पैङ्के वाऽऽप्लवः स्यात्॥ ॥ कुलजे सगोत्रे सपि नपुंसके
ण्डे वानप्रस्थे यतौ मस्याप्यसपिण्डत्वेन तीयपत्रज्ञी क्लीबे चोपरमति मृते आप्लवः स्नानमात्रमेव शुद्धिहेतुः
स्यात्सर्वेषां॥ तथा च पराशरः॥ देशान्तरमृतं श्रुत्वा क्लीबे वैखानसे यतौ॥ मृते स्नानेन शुध्यंति गर्भस्रावे च
गोत्रिण इति॥ इदं च स्नानमौर्ध्वदेहिककर्मानधिकारिविषयं॥ सन्निहितं सपिण्डत्वाद्यनापाद्य संबंध्यनिमित्तका

शौचमात्रापवादे त्वौर्ध्वदेहिकानुष्ठाननिमित्तकतदपवादानावात् । एवमन्येऽपि । यत्तेस्त्वौर्ध्वदेहिकमेवैना
स्तिकृ जननग्रहणं मात्रौचप्रयोजनाभावात्पर्यवसितं धर्मार्थोपलक्षणं ॥ ॥ यो विकौ विप्रगुद्येमृते वतिवदि
नं ॥ योजिनां नवां विप्राणां गुह्ये रक्षणाय मरनवति तत्संबंधिनां दिनमहोरात्रं माशौचं ॥ तथा वसिष्ठः ॥ आत्त
रणं चैव पत्रानां योषितां गोग्रहे पि वा ॥ प्राहवे विहतानां च एकरात्रमशौचकमिति ॥ ॥ ॥ ॥ आहतवहते
विशेषमाह ॥ ॥ युद्धविषेवत्सयः ॥ ॥ निरुशस्त्रौ मृते पत्नन्हुणर्थः ॥ युद्धे पत्नमिमृते सद्यः स्नानमात्रेण
शुद्धिः ॥ एकयोगनिर्दिष्टत्वात्सर्वत्रोपलक्षिते युद्धहते विशेषको तनाप्तिक्षिशब्दार्थे वशब्दः ॥ तथा च मनुः ॥
उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च ॥ सद्यः संतिष्ठते यज्ञस्तथाशौचमिति स्थितिरिति ॥ अन्यो यत्तेदित्यादि
विशेषणलाभाय युद्धमृइ प्रतीतिः ॥ तथा च । पूर्ववाक्यं युद्धेन्हते न कालांतरमृतविषयं । अत्र तु और्ध्वदेहिककर्म
पर्युदासो नास्ति ॥ सद्यः संतिष्ठते यज्ञस्तस्योक्तत्वात् ॥ यतो स्वकर्म ॥ ॥ ॥ अथ यष्ठस्वतमाह ॥ ॥ शाखेतातेद
शान्तात्र्यतिविषयकेप्राक्त्रिमासात्त्रिरात्रं पक्षित्वाषष्ठमासादि दिनमिहनवमात्स्यात्ततः स्नानमात्रं ॥ ॥ अस्यार्थः ॥
विषयगे बुध्यमाणे लक्षणदेशांतरस्थितेयस्मिन्देशेऽनाशौचवर्जिनः संति तस्मिन्नेव देशे तु तत्र दशाह ॥१२॥
प्रहतिनिदशाहादिके आह्नाणाद्यादिनानिप्रयुक्ते शाखेमृतिनिमित्ताशौचेऽतीते अतिक्रम्य इते हते सति
दशाहादिकालपरिछेद्याशौचनिमित्तभूतेमरणे दशाहाद्यनंतरं ज्ञातास तीति यावत् त्रिमासान् तृतीयमास
मारी प्राङ्मासत्रयमध्ये त्रिरात्रं ॥ तदूर्ध्वं षष्ठमासमभिव्याप्य तत्समाप्तिपर्यंतं पक्षिणी ॥ ततो मासान् मिवर्तमा
नाहरिपयुक्तामध्यगतारात्रि ॥ तदूर्ध्वं नवममासमभिव्याप्य समाप्तिपर्यंतं तावदिहविषये दिनमहोरात्रं ॥

ततोनंतरं द्वादशमासपर्यंतं स्नानमात्रं । कालनिरपेक्षशुद्धिहेतुः स्यात् सपिंडानां । न पुनरतिस्य मरण
दशाशौचनिमित्तत्वात्ततः आरभ्य पूर्वं दशाहादि ज्ञयतीत्यर्थः ॥ तथा च वृद्धवसिष्ठः ॥ मासत्रये त्रिरात्रं
स्यात्षण्मासे पक्षिणी तथा । अहस्तु नवमादर्वागूर्ध्वं स्नानेन शुध्यतीति ॥ स्नानेनो दकदानमप्युपल
क्ष्यते ॥ सर्वेषामेव संवत्सरे पूर्णे त्रेते दत्वोदकं शुद्धिरिति याज्ञवल्क्यस्मरणात् ॥ पञ्चमानवे ॥ संवत्सरे व्य
तीते तु स्पृष्ट्वैवापो विशुध्यतीति ॥ स्ने वचनान्तरणंतोऽकालनिरपेक्षं ॥ अत्र च वाक्यद्वये संवत्सरग्रह
णं तदूर्ध्वमपि दिवस्नानमात्रस्पर्शं तु वर्षमध्ये नवमादूर्ध्वमपराधिकायो वा अभिप्रायेण ॥ उदाहृतवसिष्ठ
वचनात् ॥ शाखाग्रहणेन दशाहाद्याशौचनिमित्तभूतस्य जननस्य दशाहाद्यनंतरं श्रवणे पित्रादीनां तत्को
माशौचं नास्तीति दर्शयति ॥ तथा च देवलः ॥ नाशुद्धिः प्रसवाशौचे व्यतीते षु दिनेष्वपीति ॥ पितुः स्तुस्ना
नमात्रमस्त्येव ॥ निर्दिष्टं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च ॥ सवासा जलमाप्लुत्य शुद्धो भवति मानवः ।
इति मनुवचनात् ॥ एतच्च पुत्रग्रहणं । इतरसपिंडजन्मन्यतिक्रांताशौचाभावस्य ज्ञापकं ॥ अन्यथा
अक्षत्वा जन्मवचनिर्देशमिष्येवावक्ष्यत ॥ दशाहात्ययनन्तरे तु त्रिरात्राद्याशौचनिमित्तभूते तु उपनीता
दिमरणे व्यतिक्रांताशौचं नास्तीति दर्शयति ॥ ॥ तथा च व्याघ्रपादः ॥ ॥ उपनीते तु विषमं तस्मिन्नेवा
तिकालजमिति ॥ अत्र यद्यप्युपनीतग्रहणं दत्तकपात्रपर्युदासेषाचार्यस्योदकादिमरणे तिक्रांता
शौचं प्रसक्तमेव । तथापि । त्रिरात्राहोरात्राद्याशौचनिमित्तेमरणे त्रिरात्राद्यनंतरं ज्ञाते तः पक्षधर्मस्यो
क्तत्वेन त्रिरात्राद्याशौचविधानस्याप्युक्तत्वाद तिक्रांते दशाहेऽवितिवमनुवचनेस्य एमेव दशाहग्रह

एतद्दशाहादिजात्याशौचविषयत्वमेव। अतिक्रांताशौचविधेर्युक्तमित्यभिप्रेत्य॥ दशाह
मन्तरीत्युक्तं॥ ऊर्ध्वं दशाहात्तु॥ प्रोषितकालशेषस्यात्पूर्णे दत्वोदकं शुचिर्भवेदिति याज्ञवल्क्य
वचनपाठानुसारेण मानवनिर्देशयत एतस्य निःक्रांताशौचस्य कालपरत्वमंगीकृत्य त्रि
रात्राद्याशौचातिक्रमे पक्षिण्यादिकमात्रमुक्तं॥ देशांतरविशेषस्य वक्ष्यमाणत्वाद्विषयग
इत्युक्तं॥ अंतरा तु वक्ष्यति॥ देवलवचनत्वेनैवोक्तं॥ आत्रिपक्षात्त्रिरात्रं स्यात्षण्मासा
त्पक्षिणी ततः। परमेकाहमावर्षादूर्ध्वं स्नातो विशुध्यतीति॥ स्नानविषयप्रदर्शकमिता
क्षराग्रंथे। अर्वाक्संवत्सरादित्युक्तेरभिप्रायं न विद्मः। अत एवात्र वक्ष्यमाणदूर्ध्वमविशेषेण
स्नानमुक्तं॥ स्नानं देशांतरस्थेन तु॥ देशांतरस्थस्य तु नात्याशौचमिति जीवति मरणाद्द
शाहाद्युत्तरं ज्ञाते अविशेषेण स्नानोदकमात्रं दानमात्रं॥ नतु त्रिरात्रादि॥ तथाच स्मरणं ॥१२॥
देशांतरमरणं कृत्वेत्यादि। पूर्णे दत्वोदकं शुचिरिति च॥ तस्मान्मूलोक्त एव विज्ञानेश्वरादि
बहुनिबंधसंमतः पक्षो युक्तः॥ देशांतरलक्षणं बृहस्पतिनोक्तं॥ महानद्यंतरं यत्र
त्र गिरिर्वा व्यवधायकः। वाचो यत्र विभिद्यंते तद्देशांतरमुच्यते॥ देशांतरं वदंत्यन्ये

षष्टियोजनमायतं। चत्वारिंशद्वदंत्यन्ये त्रिंशदन्ये तथैव चेति॥ एषां च पक्षाणां देशपरि
ग्रहेण व्यवस्था। बुद्धिविवेके तु॥ षष्टियोजनांतरत्वं॥ तदन्यांतरे शिष्टाचारभेदः॥ गिरिम
हानद्यादिव्यवधानादिवेति लक्षणद्वयमिति कृष्णेनोक्तं॥ मातापित्रोर्मरणे अपवादमाह॥ स
पितृविषये देशकालाविशेषात् स्वं स्वं॥ मातापितापितरौ तद्विषये तु। मरणे दशाहा
द्यंतरं यदाकदाचिद्यस्मिन्कस्मिन्नपि देशे ज्ञाते देशकालाऽविशेषात् स्वदेशविदेशरूपदेश
विशेषं त्रिमासषण्मासादिरूपं च कालविशेषमनालोच्य स्वं स्वं दशाहाद्याशौचं
पुत्रैः कर्तव्यं॥ तथाच पैठीनसिः॥ पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः॥ श्रुत्वा तद्दिन
मारभ्य दशाहं सूतकी भवेदिति॥ अपिशब्दात्कालांतरेपि॥ अपवादांतरमाह॥ मातुः स
पत्न्याः त्रिदिनं॥ देशकालाविशेषादित्यनुवर्तते॥ मातुः सपत्न्या मरणे आशौचकालोत्त
रं यदाकदाचिद्यस्मिन्कस्मिन्नपि देशे ज्ञाते त्रिदिनमाशौचं पुत्रैः कार्यं॥ तथाच स्मृत्यंतरं॥
पितृपत्न्यामपेतायां मातृवर्जं द्विजोत्तमः॥ संवत्सरे व्यतीतेपि त्रिरात्रमशुचिर्भवेदिति॥
दशमतिक्रांताशौचं समाप्तं॥ दशमाशौचकालातिक्रांतयदशौचमुक्तं सर्ववर्णानां समा

नं ॥ न वर्णजेदारक्लिन्नं ॥ तथाच व्याघ्रपादः ॥ ॥ तुल्यं वयसि सर्वेषामतिक्रांते तथैव चेति ॥ ॥ इ ॥
अथ संस्थामरणमाह ॥ ॥ पित्रोर्गेहे समूढप्रसवमरणयोरेकरात्रत्रिरात्रे स्यातां पित्रादिकी
नां ॥ ॥ मातापितृगृहे सम्यगूढायाः परिणीतायाः दुहितुः प्रसवे मरणे च यथाक्रमं । पित्रो
रेकरात्रत्रिरात्रे स्यातां । प्रसवे एकरात्रं मरणे त्रिरात्रं ॥ आदिपदग्राह्याणां तु । भ्रातॄणां माता
पितृगृहवासे सति तद्गृहे तदभावे स्वगृहे नागम्याः प्रसवमरणे च पूर्ववदेव एकरात्रत्रिरात्रे ॥
तथाच विष्णुः ॥ संस्कृतासु स्त्रीषु नाशौचं पितृपक्षे तत्प्रसवमरणे च पितृगृहे स्यातां । त
देकरात्रं त्रिरात्रं चेति ॥ पितृपक्षस्येति विशेषः ॥ तदुपलक्षणमात्रं ॥ पक्षपदेन भ्रातर एव गृह्यंते ॥ तै
वाक्यांतरे भगिनीमरणे त्रिरात्रविधानात् ॥ पतिगृहे तु समूढाप्रसवमरणयोर्मध्ये प्रसवे तावन्ना ॥१४॥
वैव पित्रादीनामाशौचाभावः ॥ प्रापकाभावात् ॥ मरणे तु पित्रोः त्रिरात्रं भवत्येव । बैजिकादभिस
बंधादनुरुंध्यादघं त्र्यहं । प्रत्तास्वप्रत्तासु योषित्सु संस्कृतास्वसंस्कृतासु च ॥ १ ॥ मातापित्रोस्त्रिरात्रं स्यादि
तरेषां यथाविधिः ॥ इत्यादिसामान्यस्मरणात् [illegible] वाक्यगतपितृगृ
हे गणस्य च प्रसवपक्षो विषयत्वेन सार्थक्यात् ॥ भ्रातॄणां तु वक्ष्यमाणपक्षिणीत्रिरात्रस्य ॥ गृहे
यस्मात् ः क्वचिद्दसपिंडः कृयं चन ॥ तस्याप्याशौचं विज्ञेयं त्रिरात्रं नात्र संशयः ॥ इत्यंगिरसो वचनेन

गृहमरणे व्यवस्थापितत्वात् । इदं च वचनमुक्तवक्ष्यमाणविषयस्मृत्यंतरोक्तपक्षिण्यादिकल्पानां विकल्पेन
त्रिरात्रव्यवस्थापकमेव लाघवात् अन्यगृहे यत्किंचिद्दसपिंडमरणे अपूर्वत्रिरात्राशौचविधायकं नोरवानु
वाक्यांतरविहिते करात्रविधौ रोधः ॥ असपिंडे स्वद्वेनवज्ञात्याशौचानर्हत्वमते ॥ एवं वक्ष्यति यत्र त्रिरात्र
च्चैव नियमेनोक्तं ॥ तत्र स्वगृहे ऽन्यगृहे वा मरणे तदेव ॥ यत्र तु त्रिरात्रं पक्षिण्या एकरात्रेण वा विकल्पि
तमुक्तं तत्रांगिरसो वचनाच्च त्रिरात्रस्य स्वगृहमृतविषयत्वं ॥ इतरस्य तदितरविषयत्वं । एवमाह
विकल्पितायां पक्षिण्यामप्येवं व्यवस्था । यत्र तु त्रितयं विकल्पितमुक्तं यथा मनुनादिः ॥ तत्र त्रिरात्रस्य
पूर्वोक्तविषयत्वमेव पक्षिण्यास्तु मैत्र्यादि तथयोनिविषयत्वं आयर्ध्वनिविषयत्वं वा । एकरात्रस्य तु
लादिमात्रविषयत्वमित्युत्सर्गेण व्यवस्थाप्रकारः प्रसंगादत्रैवोक्तः ॥ क्वचिच्चान्येऽपि व्यवस्थापक्षं
वक्ष्यामः ॥ षडशीत्यां तु अंगिरोवचनस्य विधित्वमभ्युपगम्य सर्वत्रोक्तवक्ष्यमाणविषये त्र्याशौ
वभार्यागृहमरणे त्रिरात्रमुक्तं ॥ तं धर्मक्रियं विजयाद्युपेक्ष्यं ॥ तत्रैव दुहितुः समूढायाः पितृगृहा
दन्यत्र मृतौ पित्रोः पक्षिणीत्युक्तं ॥ तदपि मूलाभावादयुक्तं ॥ ॥ अपितृमरणे ऊढपुत्र्यास्त्रि
रात्रं ॥ ॥ पित्रोर्मरणे ऊढपुत्र्याः परिणीतदुहितुः त्रिरात्रमाशौचं ॥ तथाच वृद्धमनुः ॥ पि

त्रौतपरमेस्त्रीणमूढानां तु कन्यं भवेत्। त्रिरात्रेण शुद्धिः स्यादित्याह भगवान्मनुः॥ इति॥ अनूढानां
तु पुत्रादि विदाशौचं॥ ॥ प्रेते आचार्य मातामह दुहितृसुत श्रोत्रियर्त्विक् सयाज्य स्वस्रीयेषु त्रि
रात्रं॥ ॥ आचार्यो ऽउपनीय वेदाध्यापकः। मातामहदुहितृसुते। श्रोत्रिये स्वसूत्रवति तेऽस्व
शाखाध्यायिनि। ऋत्विजि स्वस्रीये यजमाने भागिनेये च प्रेते शिष्या दौहित्रादयस्त्रि
रात्रमशुचयः स्युः॥ तथाच बृहस्पतिः॥ अहं मातामहाचार्य श्रोत्रियेषु शुचिर्भवेदिति॥ श्रो
त्रिये च समानग्रामीणे ४ मैत्री प्रीति वेदैकत्वादिना सम्बन्धेन वा सम्पन्ने त्रिरात्रं द्रष्टव्यं॥
श्रोत्रिये तूपसम्पन्ने त्रिरात्रमशुचिर्भवेदिति स्मरणात्॥ अनुपसंपन्ने तु समानग्रामीणमा
त्रे एकाहः। सब्रह्मचारिणी समानग्रामीणे च श्रोत्रिय इति वक्ष्यमाणैकाहः॥ अस १२५॥
मानग्रामीणे त्वाशौचाभाव एव। दौहित्रभागिनेययोश्चोपनीतयोस्त्रिरात्रं। अनुपनीतयो
श्च वक्ष्यमाणपक्षिणी॥ संस्थिते पक्षिणीं रात्रं दौहित्रे भागिनीसुते। संस्कृते तु त्रिरात्रं स्यादिति
धर्मो व्यवस्थित इति वृद्धमनुवचनात्॥ प्रचेतोऽपि॥ मृते च ऋत्विजि याज्ये च त्रिरात्रेण वि
ध्यतीति॥ एतच्चाचार्य मातामहादेः त्रिरात्रादि अन्यस्मिन्नंत्येष्टि कर्त्तरि सत्यवगंतव्यं॥ य

रात्तु ऽसन्निहिताधिकार्यंतराभावात्स्वयमेव तेषामौर्ध्वदेहिकं करोति तदा संपूर्णमेवाशौचं॥ ॥ गुरोः
स्य प्रेतस्य शिष्यस्तु पितृमेधं समाचरन्। प्रेताहारैः समं तत्र दशरात्रेण शुध्यतीति मनुवचनात्॥
त्रिदिवसमशुचिः सोदकः स्यान्नयत्र॥ ॥ यद्यपि सपिंडता तु पुरुषे सप्तमे निवर्तते। समानोदकता
वस्तु जन्मनाम्नोरवेदन इति मनुना। सप्तमपुरुषादूर्ध्वं यावज्जन्मनामावेदनं तावत्सोदकत्वमुक्तं
तथाप्यत्र गोत्रजेष्वेकरात्रस्यापि वक्ष्यमाणत्वादत्र सप्तमपुरुषादूर्ध्वं चतुर्दशपुरुषपर्यंताः
सोदकपदेन गृह्यंते। समोदक उच्यते यत्र सोदकांतर प्रसवे ऽनुपनीत सोदकांतरमरणे त्रिदिवस
मशुचिः स्यात्॥ तथाच मनुः॥ जन्मन्येकोदकानां तु त्रिरात्राच्छुद्धिरिष्यते। शवास्पृशो विशुध्यंति
त्र्यहात्तूदकदायिन इति॥ इदं च त्रिरात्रं दशरात्रं वाशौचमाशौचमनिष्यत इत्यादिवाक्येषु दशरात्रतु
ल्यविषयत्वेनोक्तान्नतोभिन्नविषयमपि पूर्णप्रसवे उपनीतमरणे च बोद्धव्यं। अर्वाक्चूडाकरणा
न्मात्रं कल्प्यं॥ ॥७॥ ॥ अथ पक्षसमवर्त्तमाह॥ ॥ पक्षिण्याशौचमाचार्यदुहितृसुतसहाध्या
यि बंधुत्रयातेवासि स्वस्रसुमित्रः स्वश्रूत्वगनिकाभागिनिकाभागिनेयः प्रयाणे॥ मातामह्यां च पि
त्रोः स्वसरि चाचिरेते मातुले मातुलान्यां च॥ ॥ दौहित्र भागिनेययोश्चानुपनीतो। एकस्मात् गुरोर्बहु
कुर्वन्सह वेदमधीयानः सहाध्यायी॥ आत्मनः पितृष्वसुर्मातृष्वसुर्मातुलस्य च पुत्रा आत्मबांध

वः। पितृष्वसुर्मातृष्वसुर्मातुलस्य च पुत्रा मातृबांधवा इति बांधवत्रयं॥ अंतेवासी सहाध्यायी वदेव॥
मद्धाशिष्यः शिष्टाचारशेषाः प्रसिद्धाः॥ ऋत्विगादीनां प्रयाणे मरणे मातामध्याहोच विरते त्रात्विकापी
निरूपकसंबंधानां याज्यादीनां पक्षिण्याशौचं॥ विरतपदस्य लिंगविपरिणामेन मातामहमातामह्योरनु
षंगः॥ तथा च यमः॥ श्वशुरयोर्जामित्र्यां च मातुलान्यां च मातुले। पित्रोः स्वसरि तद्वच्च पक्षिणीं क्ष
पयेन्निशामिति॥ तथा॥ मातुले श्वशुरे मित्रे गुरौ गुर्वंगनासु च॥ आशौचं पक्षिणीं रात्रिं मृता मा
तामही यदि॥ अत्र गुरुः वेदाध्यापकः॥ मनुरपि॥ मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बांध
वेषु चेति॥ गौतमोपि॥ पक्षिणीमसपिंडे योनिसंबंधे सहाध्यायिनि चेति॥ योनिसंबंधा मा
तुलमातृष्वस्रीयपैतृष्वस्रीयादयः॥ ॥ अथोभयज्योतिरेव स्वविषयनृपतौ ग्रामनाथे च मृते ॥१६॥
॥८॥ ॥ स्वदेशाधिपतौ स्वग्रामाधिपतौ च नष्टे सज्योतिराशौचं॥ सति कालिमे न सूर्यनक्षत्र
रूपेण ज्योतिषा सह वर्तत इति सज्योतिः॥ दिने मृते दिनं। रात्रौ मृते रात्रिरित्यर्थः॥ तथा च मनुः॥ प्रे
ते राजनि सज्योतिर्यस्य स्याद्विषये स्थित इति॥ वृद्धमनुरपि॥ ग्रामेश्वरे कुलपतौ श्रोत्रिये च
तपस्विनि॥ शिष्ये पंचत्वमापन्ने शुद्धिर्नक्षत्रदर्शनादिति॥ ॥९॥ ॥ अथ नवमहरन्तमाह॥
शिष्योपाध्यायबंधुत्रयगुरुतनयाचार्यतोर्याज्ञिको त्रानूचानः श्रोत्रियेषु स्वगृहपरमृतौ मा

तुले चैकरात्रं॥ शिष्य एकदेशमध्यापिते। वेदविद्यार्थिमात्रं वा। उपाध्याय एकदेशाध्यापकः॥ गुरोराचार्य
स्य तनयः॥ समोत्र स्मृत्युद्दिष्टाकुरुश्याहू धर्मयजनार्थनाममध्यानं। अनूचानोंऽगाध्यापकः। श्रोत्रियः समा
नग्रामीणः॥ शिष्यादिषु मातुलांतेषु नष्टेषु स्वगृहे परस्याऽसपिंडस्यैतद्विज्ञस्य मृतौ च निरू
पकसंबंधिनामेकरात्रमाशौचं॥ तथा चाऽहरिसोमनुवतौ याज्ञवल्क्यः॥ गुर्वंतेवास्यनूचानमातु
लश्रोत्रियेषु चेति॥ अत्र गुरुरुपाध्यायः॥ गुरवे गुरौपि तु तद्विसपिंडत्वेन दशाहसत्वात्॥ असपिंडाना
येवा त्रिरात्रसत्वात्॥ अत्र मातुलग्रहणं बांधवानामुपलक्षणमिति विज्ञानेश्वरः॥ मनुरपि॥ त्रिरात्रमाहु
राशौचमाचार्ये संस्थिते सति। तस्य पुत्रे च पत्न्यां च दिवारात्रमिति स्थितिरिति॥ विष्णुरपि॥ असपिं
डे स्ववेश्मनि मृते एकरात्रमिति॥ जाबालिरपि॥ एकोदकानां तु त्र्यहो गोत्रजानामहः स्मृतं॥ मातृ
बांधवे गुरौ मित्रे मंडलाधिपतौ तथेति॥ ॥७॥ ॥ रात्रिं मत्ब्रह्मचारिणि॥ ॥ एकाचार्येपि नीतः स
ब्रह्मचारी। तस्मिन्नष्टे सति अहोरात्रमाशौचमित्यर्थः॥ पितरः सब्रह्मचारी कुर्यादिति॥ तथा चाऽऽश्व
लायनः॥ एकाहं सब्रह्मचारिणीति॥ ॥७॥ ॥ अथ तु दूरमपि स्वल्पकं संबंधप्रस्तके स्नानं नाशौचमुक्तं
स्यात्॥ ॥ कथमपि चेत्तु विभिन्नकारेण स्वल्पेन एकाहाद्याशौचं त्रयोदकत्वेऽपि वा नेन संबंधेन युक्ते॥ जा
मातृराजकादेन नष्टे वा सा पुंसवस्त्रस्नानं स्यात् तु तिथौ गोत्रे॥ तथा च मनुः॥ जनिमांसं स्पृष्ट्वा

छ्व

यांतु भ्रातर्य पिवसं स्मृते ॥ मित्रे जामातरि प्रेते दौहित्रे भगिनीसुते ॥ २ ॥ शालकतत्सुते चैव सद्यः
स्नानेन शुध्यतीति ॥ भ्रातृभगिनीदौहित्रभागिनेयेषु सद्यः शुध्यन्निधानं देशांतरवि
षयं ॥ अत्रैवैतास्मिन्यघत्रयेस्मृतिषु यत्र एकस्मिन्नेव विषये नानाविधाऽशौचकालप्रतिपाद
नमस्ति तत्राशौचभागितदन्यगृहमरणरूपेण पूर्वोक्तप्रकारेणाल्पकालातिशय तदभावा
भ्यां चोत्सर्गतो व्यवस्था द्रष्टव्या ॥ आचार्योपाध्यायशिष्यसहाध्यायिषु निवृत्ताऽध्ययनत्वा
वृत्ताऽध्ययनत्वाभ्यां सकलैकदेशाध्ययनेन च ॥ आचार्योपाध्याययोर्वैकस्पकालत्वेन शौ तस्यार्तनि
दिनं चेतीतिदिक् ॥ ॥ इदमपि सकलजन्मरूपि लोकेषु तुल्यं ॥ ॥ इदं श्लोकत्रयोक्तम सपिंडाशौचं च दंपसा
णं च सकलमपि सन्निपाताशौचादिकं सर्ववर्णेषु तुल्यं भवति ॥ उपनीताशौचं द्वयेण विशेषोऽपाद
तेनाविहितत्वात् ॥ ॥ ॥ पूर्वप्रवृत्ताशौच द्वितीयादिदिनेषु ब्रह्माशौचांतरनिमित्तसन्निपा ॥१७॥
ते प्रतिनिमित्तं । नैमित्तिकावृत्तिन्यायेन पृथग्दशाहादिकं प्राप्तं तत्र पूर्वप्रवृत्ताशौचावधिकं शि
ष्टादिनानामुच्चयकाधारण्येपि तदुत्तरमाशौचांतरस्यैकादशाहादिष्वनुवृत्तिप्राप्तापवादमाह ॥
॥ ॥ अथ दशमवृत्तमाह ॥ ॥ बहुाशौचस्य मध्ये च परमपि समं स्वल्पकं सजाति प्रेतेजात्स्य

तरं चायादिन्नवति तदा पूर्वशेषेण शुद्धिः ॥ ॥ बहुस्य पूर्वप्रवृत्तस्याशौचस्य तत्परिच्छेदकद
शाहादिरूपस्यकालमध्ये द्वितीयादिदिनेषु समं पूर्वप्रवृत्ताशौचसमकालव्यापकं स्वल्पकं तेनो
नकालव्यापकं वा सजाति जन्मनिमित्तं जन्मनिमित्तं मृतिनिमित्तं मृतिनिमित्तं चापरमप्याशौचं तन्
निमित्तस्य जननमरणं तयोः सन्निपाते न यदि भवति । प्रेतमृतिनिमित्ताशौचे मध्ये जातस्यं तरं तद्विजा
तीयं ताद्दशमेव जननाशौचं वा यदि भवति तदा तस्याशौचां तरस्य पूर्वशौचकालशेषेण नवदि नादिरूपे
ण वशुद्धिर्निवृत्तिर्भवति । नतु तन्निमित्तदाशन्य पूर्णं दशाहादि भवतीत्यर्थः । एवं च सजातीयं स्वल्पसमा
न्यतराशौचनिमित्तद्वयमेकस्मिन्नेव दिने यदि भवति । तदा विशेषाऽग्रहणा साधारणकालपरिच्छेदं
पूर्णमेवाशौचद्वयं भवति तथाल्पकालव्यापकाऽशौचमध्ये सजातीयमपि अधिककालव्यापकाशौच
निमित्तं यदि भवति तदा तदुक्तं पूर्णमेव तन्निमित्तमाशौचं भवति । तथा जननाशौचमध्ये तद्रूपे तथा
स्वल्पकालाशौचनिमित्तं समकालाशौचनिमित्तं वा मरणं यदि जायते तदा तन्निमित्तमाशौचं न भा
यमध्यपतितत्स्मृति वचनस्वधर्मा प्रयोजकं स्वकार्यं न करोतीत्यर्थः स्मृतिवदतीति वैधर्म्येण दृष्टांतः ।
किंच ऽस्पर्श्यत्वादिस्वधर्मप्रयोजकं निमित्तानां तरं पूर्णं च भवति । तथा त्रिरात्रादिप्रेताशौचमध्ये
दशाहादिव्यापकजननाशौचं यदि भवति तदास्वंकार्यं यावदस्पर्श्यत्वादिस्वधर्मप्रयोजकत्वं स्व

बालेनापि शावाशौचेन न निवर्त्तते । किं तु पूर्णमेव भवतीति । व्यतिरेके दोषोऽपि उक्तो भवति ॥ तथा चोशन
सा: । स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि । न पूर्वेण विशुद्धिः स्यात्स्वकालेनैव शुध्यतीति ॥ इदं
च जननपूर्वप्रवृत्तमरणाशौचमात्रेण तदन्तःपातितयोर्जननमरणाशौचमात्रयोः पूर्वप्रवृत्तजननाशौचमा
त्रेण च तदन्तःपातितजननाशौचमात्रस्य निवृत्तौ प्रसक्तायां लघुनाऽधिकस्य तत्र प्रतिषेधार्थं ॥ उभ
यत्र तत्प्रसक्त्यविशेषात् ॥ तथा च त्रिरात्रादिशावान्तःपातिनो दशाहादिजननाशौचस्य न पूर्वेण
निवृत्तिः ॥ किं तु स्वकालं यावदनुवर्तमानस्यैव तस्याऽस्पृश्यत्वादिस्वधर्मप्रयोजकत्वमात्रेण गरीय
स्त्वे शावाशौचे न स्वधर्मप्रयोजकत्वनिवृत्तिमात्रं ॥ एतदभिप्रेतं चैकस्यान्यतापत्त्यसंभवात् । तत्रा
ऽधिकस्य मृतके शौचं कुर्यात्सूतकमिति । अंगिरोवचनात् ॥ यत्तु आद्यानां योगपद्ये तु ज्ञेया शुद्धि
र्गरीयसा । मरणोत्पत्तियोगे तु गरीयो मरणं भवेदिति ॥ कूर्मपुराणवचनं पूर्वार्द्धोपवाद उत्तरा
र्द्धस्यांशे न तस्य लघुनापि मरणाशौचेन दीर्घस्यापि जननाशौचस्य स्वरूपनिवृत्तिः । रूपमपि बा ॥१८॥
ध्यत्वमुक्तं तेन धर्मेण । तत्सत्त्वपवादत्वे तस्योशनसो वाक्यविरोधाय स्वधर्मप्रयोजकत्वमात्रस्यापो
गरीयस्त्वप्रतिपादकत्वादयुक्तं । वस्तुतस्तु सर्वप्रकारगरीयस्त्वप्रतिपादकत्वेऽपि तस्य न पूर्वांऽपवाद
कत्वं । किं तु तदविरोधेन समाऽधिकजननाशौचगरीयस्त्वप्रतिपादकत्वमेवेति ॥ षट्त्रिंशन्मतेऽपि ॥

शावाशौचे समुत्पन्ने सूतकं तु यदा भवेत् । शावेन शुध्यते सूतिर्न सूतिः शावशोधनीति ॥ एवं चान्त
राजन्ममरणे शेषाहोभिर्विशुध्यतीति ॥ इत्यादि सामान्यवचनमपि पूर्वोक्तविशेषविषयो भव
ति ॥ अथ तत्पतिताशौचकालादधिककालव्यापिना लघुनापि पूर्वप्रवृत्ताशौचेन दीर्घस्याप्याशौ
चान्तरस्य निवृत्तिरित्युशनोवाक्यार्थापवादो देवलेन दर्शितः । परतः परतो शुद्धिरघवृद्धौ विधी
यते ॥ स्याच्चेत्पंचतमादह्नः पूर्वेणैवात्र शुध्यतीति ॥ अस्यार्थः ॥ अन्तराशौचप्रवृत्तेः
परतोऽघवृद्धौ वृद्धिमति दीर्घकालव्यापिन्यघे पतिते अशुद्धिः तद्दीर्घकालमघं परतः परं पश्चात्
ज्ञातं निमित्तमादन्यपूर्वं विधार्यते न तु पूर्वेण निवृत्तिः । तत्पूर्वप्रवृत्तं लघ्वाशौचं यदि पंचतमाद
ह्नोत्तरापतिताशौचकालार्धात्परतोऽप्यनुवर्त्तते । तदा पूर्वेणैव तदपेक्ष्या लघुनापि दशाहादिरूप पूर्वा
शौचं कालेनैव साशुद्धिः शिष्यते न निवर्त्यत इति ॥ इदमत्रोदाहरणं ॥ चतुरहान्तर्दि देशाहस्य म
रणेक्त तेशेषेण शुद्धिर्व्यत्ययमाणत्वात्पंचदिनाऽधिकमाशौचं । तन्मध्ये दशाहः शौचपाते तदेगतोन्नि
त्तिः शुद्धिः ॥ अपरं च । षण्मासगर्भपातनिमित्तषडहाशौचप्रवृत्तस्य दशाशौचपाते तस्य पूर्वेण
निवृत्तिरिति ॥ अत्र शुद्धिविवेके आद्यं भागद्वयं यावत्परस्य तु सूतके । द्वितीये पतिते चाद्यात्सूतकाच्छु
द्धिरिष्यते ॥ अत ऊर्ध्वं द्वितीयात्सूतकान्तात् शुद्धिः स्मृता । एवमेव विचार्यं स्यान्मृतकः सूतकीं ते ॥

इति ब्रह्मपुराणवाक्यानुसारेण देवलवचने पूर्वेणाप्यनुशिष्यत इति पाठं कल्पयित्वा पंचतस्यां इत्युक्तः चतुर्धा
विभक्तपूर्वप्रवृत्ताशौचभागद्वयात्परतः अथ च द्वौ सजातीयसंपूर्णाशौचांतरोपाते परतः परे पाते
णाशौचेनातीते न शुद्धिर्न तु पूर्वेणेति पादत्रयं व्याख्याय पंच... माद्युक्तः पूर्वेणाद्यभागद्वयमध्ये तद्य
शौचांतरोपनिपाते पूर्वेणैव शौचेनातीते न शुद्धिरिति च चतुर्थपादं व्याख्याय रात्रिशेषे द्व्यहाद्वि
र्याम शेषे शुद्धिस्त्र्यहादिति च तदपवादद्वयं व्याख्याय दशाहादिमध्ये पूर्णाशौचे यदि द्वितीयं स
जातीयं संपूर्णाशौचं माद्यभागद्वयमध्ये पतति तदा पूर्वाशौचापगमे न शुद्धिः। यदि तदुपरि उपांत्य
दिनपर्यंतं तदा द्वितीयापगमेन॥ अंत्यदिने तदंतरदिनद्वयेन तद्दिनरात्र्यंत्ययामे तदंतरत्रिरा
त्रेणेति व्यवस्था प्रदर्शिता॥ तत्र देवलवचनस्यैतदर्थत्वेन व्याख्यानं तावदयुक्तं पदाध्याहारस्यापूर्व
णत्वस्य स्याद्यापात्रत्वायुक्तं॥ अर्थोऽप्ययुक्तः॥ षष्ठसप्तमाष्टमनवमादिने द्याशौचांतरोपनिपाते
दशमदिनोत्तरं पंचषट्सप्ताष्टमदिनेषु तद्दुरुक्तिः। दशमदिनतद्रात्र्यंत्ययामयोस्तु तदुपनि ॥१८॥
पाते द्वित्रिदिनेषु तदनुद्धारे हि द्वित्यस्यांशद्धितत्वात्॥ नवमादिवसादिवसादिति बौधाय
नवचनविरोधाच्च॥ कस्तर्हि ब्रह्मपुराणवाक्यस्यार्थः॥ तत्र केचित् नावद्रात्रिशेष इत्यनेन सम
नार्थत्वेन दं व्याचक्षते॥ तथाहि तत्र संबंधिचरममहोरात्रं स्यादिवसरूपमाद्यभागद्वयया

वद्वितीयस्य तत्रोपतिते आद्यादेव सूतकाच्छुद्धिः अतः। आद्यभागद्वयादूर्ध्वरात्रौ सूतकांतरापाते
द्वितीयात्सूर्वोक्तत्रिभागात्सूतकांताच्छुद्धिः॥ सचरमसूतकांतो रात्रिशेष इत्यादिनोक्तातपादिन्निर्दर्शिति
इति॥ तथुक्तं॥ अथ यदि दशरात्रासन्निपाते पुराद्यं दशरात्रं माशौच मानगमाद्दिवसात्पुनःपाते
दशाहात्प्राक् पूर्वेणसह गच्छति दशमदिनपाते च स्यात् हर्षयास्सविमुच्यति। अन्याते तु त्रिरात्रहष्ठ
रात्रेषयं विधिरिति बौधायनदेवलवचनायोर्नवमदशमश्च द्वयोरूपांत्यां यदि नोपलक्षणं चेनोपांत्यै
दिनपर्यंतमेव पूर्वेण चतुर्थयामपर्यंतं चांतिमा ... रात्रे ... धिकेन तेन शुद्धेः प्रतिपादितत्वात्
रात्रिशेष इत्यादिकं त्वे तदविरोधेनैवाऽनुपदं व्याख्यास्यामः। चरमाहोरात्रविषयत्वं चास्य न वाक्या
त्रकरणवालभ्यते॥ तस्मात् ब्रह्मपुराणमिति निर्व्यालिखितमिदं तन्मितारूपाद्वादशाह्रान्निर्मलमेव
॥ यद्वापरतः परइत्यादिवाक्यसमानार्थत्वेनेदं व्याख्येयं॥ अंतरापति तस्सूतकस्य चतुर्धाविभक्तस्याद्य
द्यभागद्वयमद्ध्यावतर्यंते तदनधिककालव्यापिनि लघुनि पूर्वप्रवृत्तसूतकेन तदधिके द्वितीयेपा
तिते आद्यात्सूतकस्य तु सूतकस्त्र प्रथमनिर्दिष्टपादं तः पादिसूतकादेव शुद्धिर्न तु पूर्णता॥ अतः अ
र्ध्वं तदनधिककालव्यापिनि लघुन्यपि सूतके तदधिके द्वितीयपातिते द्वितीयात्रैव चरमनि
र्दिष्टात्सर्वसूतकादेव शुद्धिः॥ एवं पादचौशौचेपीति॥ पूर्वोक्तविशेषणविशिष्टपूर्वप्रवृत्ताशौचांतिमा

सत्स्वप्यपरेष्वपरार्थीनो नोक्तं ॥ मृते पितरि पुत्रेण क्रिया कार्या विधानतः । बहवः स्युर्यदा पुत्राः पितुरेकत्रवा
सिनः । १ ॥ सर्वेषां तु मतं कृत्वा ज्येष्ठेनैव तु यत्कृतं । द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेदिति । यदा एक
त्रवासिनः अविभक्ता बहवः पुत्रास्तु स्तदा सर्वाऽनुमत्या ज्येष्ठेन यत्कृतं तत्सर्वैरेव कृतं भवेत् सकलत्वाभा
त ॥ यदापि विभक्तास्तदापि अविभक्तेन साधारणेन कृतेन द्रव्येण सर्वेषां तु मतमित्यादि इति । नित्यत्वविषयतया
योज्यं । अविभक्तमात्रे विषयत्वे द्रव्येणेदा । विभक्तेनेत्यस्य त्वानर्थक्यापत्तेः । द्रव्येण चाविभक्तेनेत्येतत्त्रसपिंडी
करणपर्यंतं श्राद्धविषयं । न वश्राद्धं सपिंडान्तं आद्यश्राद्धं व्ययिष्येडश । एकेनैव तु कार्याणि संविभक्तधनेष्वपीति वच
नात् श्राद्धं कैकतमतिनवसत्त्वाच्च ॥ तस्माद्विभक्तानामविभक्तानां वानेकेषां भोरसानां संनिधानेपि तिता द्वि
प्रमानं ज्येष्ठ एव सपिंडीकरणपर्यंतं कुर्यादिति ॥ तदसंनिधानादौ तु वरज्ञ एव कोऽपि श्राद्धपर्यंतानि कुर्युरेव । तस्य
नियतकालवर्तित्वात् प्रतिनिधयस्तु कर्तृत्वेनोच्यन्ते । मुख्याभावोऽप्यधिकारानिषेधात् कुल्यान्यायत्वेपि मुख्यद्रव्य
ण ऽपरनिकत्वं सत्याभावादसंनविरुद्धेन कर्तृत्वस्येवाऽधिकारापत्तिरिति च रूपस्य प्रोषिते मृते वा

यजमानियाजमानमृतेषु प्रतिनिध्यभावान्न्यायस्यद्व्याऽधिकारसाधारण्या स्यात्त्वमिह पुत्रैः अप्रवर्तते कर्तृ
त्वं श्रोते तेषामनुष्ठस्य तत्स्य न्यायस्यासादृश्यमाणं पुत्रातिरिक्ताधिकारित्वं तु यत्किन्यायात्तत्रैव प्राप्नोति व
चनं च। पिंडदोंशहरश्चैषामित्यादि पूर्वस्वरूपाभावेऽपाधिकमेव तेषामंशग्रहणं एव पिंडदानेऽपि कर्तृत्वं विदधा
ति। तथापि। असगोत्रः सगोत्रो वेति वाक्यारंभसामर्थ्यात् सोऽपि तावसि तत्पुत्रमिति वाक्यारंभसामर्थ्याच्च पूर्व
पूर्वसन्निध्यसत्त्वावपि तेषां तत्र कर्तृकत्वमवसीयते। यदि हि स्वस्वरूपेण पूर्वपूर्वाभावे एव तत्तेतरस्य
कर्तृत्वं तदेव वचनद्वयमनर्थकं प्राप्नुयात्तदर्थस्य॥ यदा तु पूर्वपूर्वसंनिधानाद्यभावेषु ततो तदितरस्य कर्तृत्वं तदा
तदसन्निधानादिना तदन्येन प्रथमदिनकृत्ये कृते पश्चात्तत्समासन्ने सन्निधौ प्रवृत्तेऽपीति वेदितन्यायेनउत्त
रकर्माणि तस्यैव कर्तृत्वमप्राप्ते पुत्रासन्निधौ चसपिंडोऽपि तत्सर्वक्रियास्विव भ्रात्रादीनामप्यधिकारे प्राप्ते इद
वचनद्वयमर्थवद्भवति॥ सपिंडीकरणं तु पुत्राः साग्निकाश्चेत्कृत्वरमकाल्याव ज्येष्ठान्तरा एकादशाहे वा कुर्युः॥ ॥५२॥
वपिंडपितृयज्ञार्थं साग्निकस्य तत्काले तस्यावश्यकत्वात्। निरग्निकैस्तु चरमकालं यावज्ज्येष्ठाऽनुष्ठानं प्रती
क्षणीयं तन्मध्यतातेऽपेक्षे नैव कार्यं न चरमकाले कनिष्ठैरपि कार्यं पूर्वकादेव न्यायात्॥ ॥पुत्रा अतिरिक्ताना
मुविशेषो वक्ष्यते॥ ॥ औरसात्तादेव पुत्रिकापुत्रादयो याज्ञवल्क्योक्तक्रमेण कुर्युः॥ तथा च याज्ञवल्क्यः॥
औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः। क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा॥ गृहे प्रच्छन्न उत्पन्नो गू
ढजस्तु सुतः स्मृतः। कानीनः कन्यकाजातो मातामहसुतो मतः॥ अक्षतायां क्षतायां वा जातः पौनर्भवः

सुतः॥ दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्॥ क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्वयं कृतः। दत्तात्मा तु स्वयं दत्तो
गर्भे विन्नः सहोढजः॥ उत्सृष्टो गृह्यते यस्तु सोऽपविद्धो भवेत्सुतः॥ १२॥ पिंडदोंशहरश्चैषां पूर्वाभावे परः परः॥ ॥
इति॥ धर्मपत्नी द्विजातीनां द्विजैव। शूद्राणां तु मुख्यपत्न्यभावेऽपि तत्तुल्यपरिणीता॥ तस्यां तस्मीजातु औरसः
प्रत एवं विज्ञुना। स्वक्षेत्रेस्वयमुत्पादितः प्रथमः इत्युक्तं॥ एवं च मनुना। संस्कृतायां सवर्णायां स्वयमुत्पादयेत्तु यं।
तमौरसं विजानीयात्पुत्रं प्रथमकल्पितमिति॥ सवर्णग्रहणं कृतं न द्विजेषु द्विजत्वाभिप्रायेण द्रष्टव्यं। यदपि योगी
श्वरेणोक्तं॥ सजातीयेष्वयं प्रोक्तस्तनयेषु मयाविधिरिति॥ तदप्यौरसव्यतिरिक्तविषयं। विधिरित्यु
क्तेः। तस्य च पिंडदानकरणत्वे नाम्ना विधेयत्वात्॥ तेना ब्राह्मणान्क्षत्रियोत्पादितयोः क्षत्रिया वैश्या पुत्रयो
रप्यौरसत्वं द्रष्टव्यं॥ ॥ अत एव अलपुत्रा ले पुत्राः॥ कुर्वंति विप्राय क्षत्रविद्शूद्रयोनय इति। क्षत्रिया वैश्या
पुत्रयोरपि दिनक्रियाकारित्वमुक्तं॥ स्त्रापुत्रस्य तु तद्वादशविधपुत्राभावे। तच्चाऽनुपदमेव वक्ष्यते। औ
रसाभावे पुत्रिकासुतः। स च द्विविधः पुत्रिकैव सुत इत्येकः॥ तथा च मनुः॥ ॥ अकृता वा कृता वापि यं विन्देत्सदृ
शात्सुतं। पौत्री मातामहस्तेन दद्यात्पिंडं हरेद्धनमिति॥ पुत्रिकायाः सुतश्चापरः॥ तथा च वसिष्ठः॥ ॥ अभ्रा
तृकां प्रदास्यामि तुभ्यं कन्यामलंकृतां॥ अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति॥ औरससमो दायग्रहे
स्वयं च मातामहस्यैव पुत्रः। संविदा तु श्राद्धविनापि॥ अत एव यम॥ कुर्यान्मातामहश्राद्धं नियमात्पुत्रिकासु
तः॥ उभयोरपि संबंधः कुर्यादुभयोरपीति॥ संविद्या दर्शितावसिष्ठेन॥ अपुत्रो हं प्रदास्यामि तुभ्यं कन्यां

त्र

नवानपि ॥ पुत्राधाना वेदितो न्यत्र: मनौ पुत्रोत्र विदिति ॥ तदभावे क्षेत्रजः ॥ सवर्णायां तु विधवायामपु
त्रां गुर्वनुज्ञातनइति यादृत्पवक्ष्यमाणविधिना जातः ॥ यस्याम्रियेत कन्याया वाचा सत्ये कृते पतिः । तामनेन विधानेन
निजो विन्देत देवरइति वचनादिति विशेषस्पविहितानेन्मराघा: । मनुनापि । पुत्रजननासमर्थस्य क्लीबस्य तोपि पत्युः क्षे
त्रनियोगेन सवर्णात् जातः सउक्तः ॥ यस्तल्पजः प्रमीतस्य क्लीबस्य व्याधितस्य वा ॥ स्वधर्मेण नियुक्तायां स
क्षेत्रजः स्मृतइति ॥ अयं च क्षेत्रिणः अनेनविधिना जातः क्षेत्रं तस्यैव स्मृत इत्युक्तत्वात् ॥ बीजिनोपि पु
त्रेच्छायां तस्यापि ॥ तथा याज्ञवल्क्यः ॥ अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः ॥ उभयोरप्यसौ रिक्थी पि
पिण्डदाता च धर्मतइति ॥ तदभावे गूढजः ॥ स च सवर्णाज्जनिश्चयेपि पुरुषविशेषस्यानिश्चयात् गृहे
सवर्णादुत्पन्नः ॥ अयं च क्षेत्रिणः ॥ तथा च मनुः ॥ उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः । सगृहे गूढ उत्प ॥ ५३ ॥
न्नस्तस्य स्याद्यस्य तल्पजइति ॥ अज्ञातं च पूर्वोक्तं द्रष्टव्यं ॥ तदभावे कानीनः ॥ स च सवर्णाद्विवाहेन तायामु
त्पन्नो मातामहस्य सुतः ॥ वसिष्ठोपि ॥ अप्रत्ता दुहिता यस्य पुत्रं विन्देत तुल्यतः ॥ पुत्री मातामहस्तेन
दद्यात्पिण्डं हरेद्धनमिति ॥ मनुनापि ॥ पद्गिलेनः पुत्र इत्युक्तं ॥ पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः ॥ तं
कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवमिति ॥ अत्र कस्यैवापुत्रत्वे न स्यैव उभयोरपि तथात्वे उभयो
रपातिदृष्टव्यं ॥ तदभावे पौनर्भवः ॥ अक्षतयोनौ अक्षतायामक्षतायां वा क्लीबतापत्याद्युक्तायां विधवा

सवर्णादिवजातः ॥ विष्णुरपि ॥ यादुपत्यापरित्यक्ता विधवा स्वेच्छया अथवा उत्पादयेत्पुनर्भूत्वा स पौनर्भव उ
च्यतइति ॥ अयं च वोढुरेव । परित्यागेन मरणे च भर्तुः क्षेत्रे स्वत्वाभावात् । विनियोगस्य चाभावात् ॥
स्वेच्छयाग्रहणाच्च ॥ तदभावे दत्तकः ॥ स च मात्रा पित्रा वा अन्यतराभावेऽन्यतरेण वा स्वं तु वर्णाय अयं तदुर्गत्या
त्वरणासामर्थ्ये न विधिपूर्वकं दत्तः प्रतिग्रहीतः सवर्णः प्रतिग्रहीतुरेव पुत्रः ॥ तथा च मनुः ॥ माता पिता वा
दद्यातां यमद्भिः पुत्रमापदि । सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतइति ॥ अद्भिरिति वचनं वसिष्ठोक्तविधरूप
सकलं ॥ आपद्ग्रहणादनापदि दातुर्दानं निषेधः । यत्कात्यायनवचनं ॥ आपदि ग्रहीतुः पुत्राभावइति व्याख्यातं
तत्पुत्रं विना यथा तेषां सद्भिः प्रतिनिषिध्य स्मृतः । तथैकादश पुत्राः स्युः पुत्रिकौरसयोर्विनेति बृहस्पतिवचनात् । क्षेत्र
जादीन् स्मृतानेतानेकादश यथोदितान् ॥ पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणइति । क्रियालोपहे
तौ औरसप्रतिनिधित्वोक्तेश्च तत्र दत्तकस्य चौरसपुत्राभावविषयत्वसिद्धेरानर्थक्यात्समानविषया
तारविरोधाच्चापेक्ष्यं । सदृशं प्रतिग्रहीतुः सवर्णं प्रीतिसंयुक्तमिति दत्तपुत्रविशेषणं ॥ विक्रयं चैव दानं च
न नेयाः स्युरनिच्छव इति वचनात् ॥ मातापित्रोः न्यायं विशेषः ॥ उभयोर्जीवतोः पत्युरपि पत्न्यनुमत्या
वदानं कथंचिदपि तदनुमत्यसंभावे तत्पादपि पत्युः स्वातन्त्र्यमपि ॥ पत्न्यास्तु पत्यौ जीवति सन्निहिते
प्रोषिते वा तदनुमत्यैव दानं तन्मते स्वातन्त्र्यमिति ॥ तथा च वसिष्ठः ॥ शुक्रशोणितसंभवः पुत्रो मातापि
तृनिमित्तकः ॥ तस्य प्रदानविक्रयत्यागेषु मातापितरौ प्रभवतः ॥ न त्वेकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा ॥

सहितं तानाय पूर्ववत्॥ स्त्रीपुत्रं दद्यात्प्रतिगृह्णीयाद्वा। न्यत्रानुज्ञाताद्भर्तुः॥ पुत्रं प्रतिग्रहीष्यन्बं
धूनाहूय राजनि चावेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा। दूरबांधवं बंधुसंनिकृष्टमेव प्रतिगृह्णी
यात्॥ संदेहे चोत्पन्ने दूरे शूद्रमिव स्थापयेत्। विज्ञायते ह्येकेन बहूंस्त्रायत इति॥ एतद्व्याचिख्यासुः पत्नीकरणे त्वे
छापि न देयं स्त्रीस्य पुत्रकार्यकरणे मुख्यत्वात्॥ स्त्रीग्रहणं त्वनुः पूर्वोक्त एव विषये स्वातंत्र्यघात्ये तेनक सर्वदा
उपक्रमविरोधात्॥ विशेषणेन निषेधसंक्रमाद्दानइव प्रतिग्रहेपि स्त्रिया अधिकारः। होमस्तु न भवति। स
तिसंभवे बंधुसंनिकृष्टं भ्रातृपुत्रादिकं तदभावे दूरबांधवं संनिकृष्टदेशवर्त्तिपित्रादिकं तो न कुलीनमन्य
मपि परीक्ष्य तस्यापि कथंचित्क्रयादिसंदेहोत्पत्तौ यावत्तांनिश्चित्य दूरस्थापयेत्तेन न व्यवहरेत्॥ न तु अस्य पु
त्रकरणं तु वंश्यकर्त्तनाय कस्याहर्षः। विघ्नं तद्दति॥ अस्य तस्य स्थः। एकेनानौरसेनापि पुत्रेण बहून्पितृनादी
न्नरकात्त्रायत इति॥ अत्र च हेमाद्रिः॥ सर्वग्रहणाद्यादननगृहीतो न दद्याद्नियमः॥ क्रीतस्वयंदत्तकृत्रिमा ॥५४॥
पविद्धेष्वपि यथासंभवं द्रष्टव्यो दत्तार्थत्वात्॥ वसिष्ठेन विक्रयः स्मर्तेपादानाय॥ स्वयंदत्तेनु होमो पितृप्रा
पिप्रतिग्रहसत्वात्॥ तत्रकाभावे क्रीतो भान्यपि हुत्वा कर्त्तव्यः॥ यत्तु क्रीणीयाद्यस्त्वपत्यार्थं मातापि
त्रोर्यमंतिकात्। सक्रीतकः सुतस्तस्य सदृशोसदृशोपि वेति। मनेव मसदृशग्रहणं तु गुणसादृश्यपरं। स
मातावेद्यवंशोकृत्रिमपुत्रसंग्रहणं॥ तदभावे कृत्रिमः॥ स च मातापितृविहीनः। प्राहोधनाहि प्र
न्नेनैन स्वयं प्रार्थिता पुत्रीकृतः पूर्ववत्॥ मनुरपि॥ स्वयंप्रकुर्वीत तद्गुणदोषविचक्षणं॥ पु
त्रं गुणैर्युक्तं स विज्ञेयश्च कृत्रिम इति॥ तदभावे स्वयंदत्तः॥ स च मातापितृविहीनः स्वात्मानं सक्रो

यात न वाहं पुत्रोस्मीति स्वयमात्मानं दत्तवान् पूर्ववद्ग्राह्यतीतः। मनुरपि। मातापितृविहीनो यस्त्यक्तो वास्या
दकारणात्॥ आत्मानं स्पर्शयेद्यस्मै स्वयंदत्तस्तु स स्मृत इति॥ तदभावे सहोढजः॥ स च सगर्भैव संस्कृतो
गर्भस्थितो गर्भिण्यां परिणीतायां स्वीकृतः पश्चादुत्पन्नो वोढुः पुत्रः॥ तथा च मनुः॥ या गर्भिणी सं
स्क्रियते ज्ञाताज्ञातापि वा सती॥ वोढुः स गर्भो भवति सहोढ इति चोच्यत॥ इति। ननु कन्यामुपयच्छेतेति
कन्याया एव विवाहविधानात्कथं गर्भिण्याः संस्कारः। अत एव विज्ञानेश्वरः॥ न तु रूपसंबंधेन कन्यात्वमपै
ति किंतु मंत्रवत्संस्कारेणैव। पाणिग्रहणिका मंत्राः नियतं सप्तमं पदं। तेषां निष्ठा तु विज्ञेया विद्वद्भिः स
प्तमे पद इति मनुस्मरणात्॥ अत एव मनुनाक्षतवाक्षतपूर्वकृतेनोक्तोरपि गांधर्वपैशाचविवाहाद्यार
त्स्वपाणिग्रहणहोमादिसंस्कारः॥ तथा च देवलः॥ गांधर्वादिविवाहेषु पुनर्वैवाहिको विधिः॥ कर्त
व्यश्च त्रिभिर्वर्णैः समयेनाग्निसाक्षिक इति॥ तत्रोयं गर्भवसंस्कृतो गर्भिण्यास्त्वन्यसंबंधेन तो
अत एव वनिपुत्रागमनानां विवाहविधौ गर्भमात्रं न होमादि॥ ननु भार्यात्वे च कन्यकाणां लौकिकातिशय
जनके॥ संस्कारधर्म॥ संस्कारधर्म विवाह एव च कन्यात्वापपत्तेस्मृते तेविधिद्वितीया निर्देशादिस
पि नांगी कर्तव्यं॥ एतयोर्निष्ठापि संस्कारामेवेन कन्यात्वान प्रागमात्राआपितद्विद्विप्रवृत्तो बाध
काभावात्॥ प्रथम अकावेन स्त्रीपुरुषयोः कन्यात्वस्य स्वगमननिषेधातिक्रमवर्त्तिनि तत्प्रस्य
वायसंभवेपि अत्रे गांधर्वादौ तद्वैवपुरुषकृद्गर्भिणीपरिणयने। स्वस्याक्षिपाम्यो न्यन्तेन

त्यरिहासन्यं गांधर्वगान्निरूपणी पदर्शन प्रभादेश पि भार्यापति भावसंपादकत्वेनाकन्यात्वादेवतदपरिहा
पनं॥ धर्ममात्रमेवा यद्यपि च नियोगो वाग्दत्ताविषयस्तथापि वाग्दानसंप्रदानस्य पतित्वात्केन्नियुक्ता
ऽस्य क्षेत्रि पुत्रत्वोक्तेश्च संपूर्णभार्यात्वाभावेपि वाग्दानमात्रेणैव क्षेत्रिणस्तं कन्यात्वापगमश्च स्पष्ट एव॥
कयोः किंतु संपूर्णसंस्काराभावात्तिस्राग्रेण संपूर्णसंस्कृता यानि योगं प्रतिनिषिध्य मनुना यस्या म्रि
यते त्याद्युक्तेः॥ अन्यथा पाणिग्रहणिका मंत्राः कन्यास्वेव प्रतिष्ठिताः॥ नाकन्यासु क्वचिन्नृणां लु
प्तधर्मक्रिया हि ताः॥ इति निषेधात्संस्कृते सद्विवाहविधिवैयर्थ्यप्रसंगात्॥ अत एव प्रागेवाभानेक्कृ
ऐः पादानेन व धिधेयता। भिन्नेऽस्मिन्विवाहे प्रजार्थविवाहात्रौ दृश्यमानापुपूर्वकपुत्रासौ। पवादत्वे
ना पुत्राग्रर्वनुज्ञाना इत्यादिव्याख्यातं॥ विज्ञानेश्वरेण॥ अनन्यपूर्विकाशब्दस्य कन्याशब्दसमानार्थ
त्वादन्यादत्तापरत्वा। न त्वन्यामुपभुक्तपरो विवाहेपि संस्कारानुपपत्तिसंगात। न चात्र सं ॥५५॥
स्कारो विधीयते। येन नियुक्तावद्ध्रावनिक धर्ममात्रमिस्तु स्युः। बलादपहृता कन्या मंत्रैर्यदि
न संस्कृता। अन्यस्मै विधिवद्देया यथा कन्या तथैव सा सेनापि वाच्योयुक्तिविशेषेणापहृत
न कन्यात्वनिवृत्तिर्णां कादिशादिविनिरासनमार्गे। क्रियते न त्वकन्यायां एव तस्याः कन्यानुत्पत्ते
नान्यस्मै दानं विधीयते। वचनमारकस्य नापतेः कन्यात्वे बाधानावाद्॥ अत एव कानीनः इप
इत्यपि युज्यते। अकृतयोनि वचनं सेऽकन्यायाः पुत्रदर्शनव्याघातात्। कल्प्यते यत तत्कृतलो

पाव्याख्यानात्तदविति हासपुराणेषु कृतयोनीनामपि विवाहः॥ एवं च सर्ववर्णेष्वनुल्यास्तु पत्नीष्वक्
तयोनिषु। आनुलोम्येन संभूता जात्या ज्ञेयास्त एव ते। इति मनुवचने तु तयोनिषु नो दुष्य
संज्ञानं तत्ता तीयत्त्वनिवृत्त्यर्थं मकृतयोनिग्रहणं पृथग्युक्तं॥ अन्यथा तासां विवाहसंस्काराभावे न तु र्यत्नीत्वाना
वात्तत्क्तहृणनैव तत्प्रयोजनलाभात्तद्वैयर्थ्यप्रसंगात्॥ न च तासां विवाहसत्त्वेपि कर्माधिकाराद्यतत्संयोगानिषि
तं पत्नीनास्त्येति वाच्यं॥ विवाहरूपसंयोगादेव तदुपपत्तेः तस्मा [illegible] पुत्रकृतादि यागरूपत्वात्॥ पाणि
ग्रहणिकामंत्रा इत्यादि निषिध्योपि संस्कृतान्निषयपैवं न तु कृतयोनिविषयः। मंत्रालिंगस्याहेतुत्वाभिधानात्॥
मंत्राणांमर्ह प्रसाययथा पचितिभा वायदेवामग्नमेवं त्वा अदुर्दत्तवंतो न त्वन्यस्मै अहमेव त्वा मितः पितृकुला
अमुं त्वामितेन त्वं न तत्वं तथा कृताः। अर्थमाह। विवहावहे तनु मर्द कृता विस्तादि प्रकारेण संस्कृतापरत्वात्॥
नतारूतयोनिपरत्वे किंचिन्मंत्रलिंगं पश्यामः। संयोगमात्रेण न स्तत्वापनयरूप पितृकुल प्रमोक्षाभावात्॥
कानीनपोत्रिकेयपौर्नताम्हपुत्रत्वाद्युपपत्तिप्रसंगात्॥ पत्नवैदिकत्वा मंत्रार्थमज्ञनो नैः साहिकैः कुल्लूकभ
ट्टस्य सा दृष्टिः कन्या अग्निमयक्षतेति मंत्रलिंगमालक्ष्य हतं तदन्यं कातविवह्वचनानेन निर्देशासम
विबाहारा द्वितीया याय यत्र बहुवचनां ते देव कन्यापरकन्याशब्देन संस्क्रियमाणा कन्याद्युकाशनाभावादसंस्कृ
ताकृतयोनि परत्वेन तस्य संदिग्धत्वादुपेक्ष्य॥ अत एव धेमनमित्यादि मंत्राणां पश्चाद्धोतृत्वेपि पातिव्रत्यो
पत्नमुत्तंत्त्वरीकृता। तस्मादकृतपुरुषप्रयोगाद्या अपि संस्काराभावेन कन्याभ्रानपापाद्युपत एवगांधर्वादिवत्कार्या
एया अपि परिणेयः॥ केवलं निषेधातिक्रमपूर्वकत्वात्कत्या गमन निषेधाप्रवृत्तिसंपादेनेन वकेवलवृत्तार्थतौ

तद्देव निषेधः॥ अत एव गांधर्वादीनां मैथुनमात्रविहितत्वलक्षणं। मैथुनस्य तत्कालतत्त्वात्तत्संतानां वनाथमु
क्तं स्मृतिषु॥ पूर्वोपगतां वोढुश्चान्यत्वेनानिंदितमप्यस्य विवाहेषु गार्गिलो परिणयस्यापादिति प्रेषध
निषिध्यतः प्रसक्तत्वात्॥ कन्या कुमारीशब्दो धर्ममेव यौवनावनुपचरतः पूर्वश्रावयतौ च कोऽप्यास्यै मात्र
न त्वसंस्कृतमात्रवचनो तदभावात्॥ यथा द्वितीयनामसंस्कृतानां गमने कन्यागमने दोषापत्तेश्च। विना
हकरणेऽनुपपत्तेः च वचनाद्भेद॥ लोकेपि तत्प्रसंगे अज्ञानात् क्षतयोनिपरिणये कामस्याः स्त्रैणे तद
कुमारीत्वस्य स्यां कौमारमित्यादि बोधनादि व्यवहारस्य तद्विषयत्वात्॥ अन्यत्रापि प्रायुर्वेला तत्रैव प्रयो
गाद्धा। क्षतयोनेरपि परिणयतो येन गर्भाधानादिसंस्कारो न मंत्राणां विधानात् कन्यत्वस्यादिनामक
मवेतार्थत्वापत्तेः। मैथुनकृतमलरूपस्य योनिकल्पनस्य प्रथममेव दुर्भोक्तेन प्राधान्याभावात्। नच
गांधर्वादिविभिन्नोक्तविषयत्वं तेषां युक्तमविशेषश्रवणात्॥ तथाच॥ कन्यास्वेव प्रपद्यन्ते संस्कृतयोगे॥५८॥
देव विवाहविधानात् गांधर्वलक्षणार्थे इच्छयान्योन्यसंयोगः कन्यायाश्च वरस्य चेति मनुवचने प्रयो
गएकत्र देशगतयोरन्योन्येच्छया चं मे पतिर्भव त्वं मे भार्या भवेति समयकृपो दृश्यते। पैशाच
लक्षणार्थे सुप्तां प्रमत्तां प्रमत्तां वा रहो यात्रोपगच्छति स चोपगच्छति राक्षिंगामार्भपरूहनकुंबनाद्यपग
मनार्थमापादितदृश्यः॥ अत एव आत्मार्पणायनस्तत्र गोयदान्यस्यकल्पस्यादेमिथः समयश्च लापलक्षणा
तं तपो अलक्षणकृतो॥ एवं विवाहविधौ कन्यात्वबद्धस्याक्षतयोनिं वक्तुं तत्त्वेन गार्गिलेष्वासु दृश्यते पाणि
णीयत्र संस्कारस्याः अनुवाद प्रतीतावप्यपरस्या विधिविधेयं दृश्यते। स च संस्कारः पुनर्भार्यापतिभावसंपा
दकः प्रमाणान्तराभावात्। किं तु तत्र धर्ममात्रं निष्कामसंस्कारवत्॥ तस्य च प्रयोजनं तस्याः कन्यात्वप

भार्यात्वविधिवाक्याभावात् गमने द्वितीयोयं तु॥ कन्यादिगमननिमित्तदोषाभावेपि स्याद्भार्यात्वस्याप्यमेवो
स दारनिन्ते: रसदोतिनियमाति क्रमनिमित्तमसक्तदोषपरिहारादि भार्यात्वासंपादनेपि तद्देव अन्यस्यानर्थ
क्यापत्तेः॥ वोढुर्दिष्टमेन। पितृविवाहप्रसक्तिज्ञातस्य स्वीकर्तुं मात्रवचनेत्यात्॥ पूर्वोक्तदूष्या गार्गिलोपि
वाहाभावात्॥ तं कालीनं वदेन्मात्रा वोढुः कन्यासमुद्भवा। मिस्त्राप्येवमेवा बोधयन्नेष तदामातामहस्य यथूढा
तदा वोढरिति। माता स्वस्यापि यथाकन्यपगोत्रे दायते। तदा तस्य तत्र माता महत्यैव सर्व व्यारव्यायाविवा
हाभावात्॥ तत्रोपरा तेच स्वीकर्तां गार्गिल्यास्त्वस्य प्रति विशेषः॥ एवं च सावदं क्षतयोनिस्याऽपि नप्रसा
गताद्विवपौनर्भवेन प्राप्तां सा पुनः संस्कारमर्हतीति मनुवचने क्षतयोनेः पुनर्वा संस्कारस्त्वोक्तिः संगच्छते॥
अन्यथा तस्याः संस्कृतत्वेन तदनुपपत्तिप्रसंगात्॥ धर्ममात्रत्वे च पुनः शब्दानुपपत्तेः॥ गतप्रत्यागता
मध्यक्षतयोनित्वमविहितमेव॥ एवं पुनस्त्यान्यक्तां विधवायां स्वयं तस्य पक्वे गार्गिल्यादि तं पतिं स्त्रकां त्यागने तिन्ने
दः॥ अत एव गार्गिल्यादिपरिणयस्य विवाहे सपीती॥ यत्तु सर्ववर्णेष्वित्यादि वर्णलक्षणार्थं मनुवचने क्षतयो
निग्रहणं तल्लोके संस्कृतास्वपि लक्षणया रतस्य पत्नीत्वादि च ना॥ शब्दप्रयोगदर्शनादन्यलक्षणे
कार्यग्रहणप्रमाणाभावेपि मैथुनं दस्याशंकानिरासार्थमिति॥ प्रपंचेनोक्तं मेधातिथिना तत्रैव व्याख्यावस
रे॥ पाणिग्रहणिका मंत्राः कन्यास्वेव क्षतयोनिषु। कन्यासु पपद्यन्ते नियमविधेः पूर्वोक्तपूर्वपक्षता
स्मरत्वात्॥ तदसिद्धा भार्यानुवादत्वात्तस्य प्रजातानां वातत्वात् मिसमि स्यादीनां सन्निहितत्वाद्विषय
नां विधिपरत्वं तत्रवेनाधिविज्ञविधेयं स्मरत्वात्॥ नियमादिना च प्रमाणाभावेन महत्वं तद्

दिस्यादीनां मौदासीन्यात् ॥ यथा कथंचिद्विवाहः अस्मान्मम वक्रू विक्रियाते वि कल्पेति विवाहाय हे ततः
पुत्री देव प्रजां प्रजनयावहै प्रजोत्सवः ऽनुकूलं व्यवायलक्षणं व्यापारं करवावहै न तु दर्शनतदेतां वितादि प्रजाके
लोक्ये मेधातिथि परत्वस्यापि दर्शं विनु मध्यत्वात् ॥ अत एव मेधातिथिना कन्याशब्दस्याऽकृतयोनित्व
वनात् ॥ कन्या अक्षतमयकन्येति मंत्रगत कुमारकन्यका नाविवाहप्रयोगे कर्तव्यत्वनिर्दिष्टत्वात्किंन पर्वपक्षे
कुमारीणां मंत्र प्रजादेवा ऽकृतयोनीनां विवाह उक्तः ॥ तथा पठितो पात्मवरेण्यार्थ तस्य कन्यानुपपद्येतेति
विधि आदेवताकां विवाहमंत्राः पुनर्विहितमेव नार्थमन्ति वदति ॥ न पुनर्मंत्रेषु कन्याशब्द श्रवणात्क
न्याविवाह इत्युक्तं ॥ प्राग्वैवाह्यमां भावात्सदस्यतात्पर्यमेतानाः ऽनैः मंत्रिक पद्यारा कन्यायां
शक्तेनैव कन्या ऽक्षतमय इत्येतेनोदाहृतमिति अमेण कन्याविवाहे तस्या सम्यक्तार्थयापत्तिरि
युक्तं तदुपेन्स्यामि युक्तं ॥ कानीनः पुत्रं इत्यस्य कुक्षिणया । संस्कृतापरत्वं कन्याशब्दस्येति । अत्रैव ॥५७॥
तत्वं ॥ कन्याशब्दस्यानन्यपूर्वा शब्दपर्याय त्वात्सर्वं वर्णनीये । प्रयोगाश्चादानोपयोगोऽन्यथाभावः प्रदर्शितं
मितं । अत एव वाच्यतस्यत्वेऽन्यथाभावो न कन्याभावात् ॥ मुख्यविवाहस्य स्मृतिषु उक्तं पुनर्मंत्र
स्कार उपयुक्ता संस्कारान्तरहयमपि वाद निर्बंध मन्वादि ॥ प्रयोगं च तस्य दर्शितं कामदेव । अत एव बहुवस्यापि
विवाहेष्विप्रवृत्ति ॥ तथा च मातापितरौ ॥ दाने नोपयोगे नवा कन्यां तदा परिगृह्य तामिति स्वनन्यपूर्वां यदं व्याख्या
तं ॥ अन्यपूर्वां नयनीयेषु युक्तं ॥ कन्यान्यपूर्वस्याप यया यत्तस्वरूप प्रतिपादितेनानुनाव सतोदेवेन्या
दिव्यवस्थितं ॥ अस्य कोद्वाकामे वेत्येवं । प्रसंगेन तेन ॥ सहोढ गाथावे पद्विधः । सप्तमो ता जितन्यो

तदन्यतरेण वरोणाभावेपि वरणासामर्थ्येन सहोढानपित्रादि सवर्णः पुत्रत्वेन परिगृहीतः ॥ मनुरपि ॥
मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा ॥ यं पुत्रं प्रतिगृह्णीयाद्पविद्धः स उच्यते ॥ एते च दायादबान्धवाः
त्रा अपि अरसः ॥ क्षेत्रज कृत्रिम पुत्रिकापुत्र एव च । कानीनश्च सहोढश्च गूढोत्पन्नस्तथैव च ॥ १ ॥ पौन
र्भवोऽपविद्धश्च दत्तः क्रीतः कृतस्तथा ॥ स्वयं चोपगतः पुत्रा द्वादशैते प्रकीर्तिताः ॥ २ ॥ अत्रैतरस्मतो
दिव क्रमां तदेतेषां शास्त्रत्वापि तत्र पविवरणनमात्र दर्शनी क्रमो । योगी अस्ते क एव प्राह ॥ पूर्वाभावे पर
परइति क्रमविधानात् ॥ विष्णुस्तु तौ तु ॥ औरसः क्षेत्रजः पुत्रिका पुत्रः पौनर्भव कानीन गूढोत्पन्न सहो
ढो दत्तः क्रीत स्वयमुपागतः ॥ पद्धिदाय च काचिन्मोत्पादिताः । प्रथमद्वितीया दिशे । नाजित्वे नाभि
धाना देतेषां पूर्वः पूर्वः श्रेयान् एव दाय हरः एतस्य केशी यद्यपि क्रमो विहितः एवं तथापि विशेषश्च
तदितिज्येष्ठोऽयमतेः क्रम स्य वा एतत्हा सदयोक्तः । आचार्यानुयात्तस्तथा पुत्र वैधर्म्यात क्रमेण
नारदोपकृत मांसा परस्येवादरणं क्रम क्रमाद्यास्त्वचतन्ते । स जावालाहाना जितं धनं । अत्रत्र
य आहतस्य पुत्रायां कामादुत्पादयेत्स्तं ॥ स पारशवः शवस्तस्मात्पारशवः स्मृतः । इत्युक्तः सो
ऽप्यादीक्षितानेतानेकादशापत्योदितान् ॥ पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः । मनुनोक्ततद्वाच
कवर्नोत्पादितस्य द्वादशगति ॥ विज्ञानेश्वरोक्तलेखे न कर्तव्यं स्मृत्वैवोर्ध्वे दैहिकं ॥ ब्राह्मणाद्वा
ब्राह्मणस्य विवाहसंबन्धात्के वि दितिः । वारदकरवचनाच्च पूर्वोक्तद्वादशविधपुत्राभावे शूद्रापुत्र
स्यापि द्विजन्ति पित्रौर्ध्व दैहिके धिकारइति प्रतीयते । विज्ञानेश्वरादिभिस्तु याज्ञवल्क्योदितं

रनुकृत्वा यद्यपि स्यात्कुसतु श्रो यद्यपुत्रोपि वा भवेत्॥ नाधिकं दृष्टमा दद्याच्छ्राद्धमापधर्मेत
इति च मनुना ऽन्यपुत्राभावे पि तस्य फलं न दाया जातो येन्नर्थः स्मार्ते तु : सपिंडदायी तिच । विस्पष्ट
पः स्तंवा ब्रूयात्पुत्रकर्तृतोदितकर्त्रहणस्य श्राद्धाधिकारप्रयोजकत्वोक्तेः । तंद्वादिवनस्यापि नाधि
कारावगमात् आधिकारिषु परिगणितः॥ यत्तु ॥ भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान्भवेत् । सर्वांस्तां
स्तेन पुत्रेण पुत्रिणो मनुरब्रवीदिति मनुवचनं तद्भ्रातृपुत्रस्य पुत्रीकरणसंभवे ऽन्येषां पुत्रीकरणनिषे
धार्थं न तु तस्य पुत्रत्वप्रतिपादनार्थं श्राद्धादौ रिक्थग्रहणे च आत्मनंतरस्याऽधिकारस्मरणात्॥ पुत्र
पुत्रस्य तु गौणपुत्रत्वमस्त्येव तेन च श्राद्धे ... दत्तकाभावे पौत्रिके य स्वभावे सपत्नीपुत्र
स्तदभावे दौहित्राधिकारः ... बहूनामेकपत्नीनामेका चेत्पुत्रिणी भवेत् । सर्वास्तास्तेन पुत्रेण
प्राह पुत्रवतीर्मनुः इति स्मरणात् पूर्वव्याख्यानं ... तदभावे स
पत्नीनः ... तेषामभावे तु पतिस्तदभावे सपिंडकाः इति कात्यायनवचनात्॥ एवं च पुत्रा... ॥
वे दुहिता तदभावे सपत्नीपुत्र इति क्रम... पुत्रस्य चानुपनीतस्याप्यत्राधिकारः न ह्यस्मि
न्युज्यते कर्म किंचिदा मौंजीबंधनात् । नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते । इति मनुवचनात्॥ सन
त तत्कुर्यात्स्यैव त्रिवर्षा... तथा च सुमन्तुः । अनुपेतोपि कुर्वीत मंत्रवत्पैतृमेधिकं॥
यद्यस्यौ ... त्रिवत्सरः इति ॥ यत्तु आद्य दाप... पिंडम
व । स्वधाकारं प्रयुंजीत वेदोच्चारं न कारयेदिति । ... तंत्र ... धानार्थं॥

यदपि देवयाज्ञिकेनास्य प्रथमवर्षान्त ... अग्निविषयत्वमुक्तं । तदपि सुमंतुवचने यदि स्यात् त्रिवत्सरः इति श्रु
... एव मापि ... अधिकारावगमादयुक्तं । अत एव कौ ... अग्निदानमात्रे समंत्रकं तेन कर्तव्य
मन्यत्तु अमन्त्रकं । ... समंत्रकं । कर्तव्यमिति तत्सर्वं कारये दन्यमेव हीति का
त्यायनवचनात्॥ यत्तु देवयाज्ञिकेन ... नानुपनीतेनाग्निदानमेव कर्तव्यमित्युक्तं । तत्कुर्यादनुपनीतोपि नी
श्राद्धमेकस्यापि ... इति सुमंतुवचनाच्छ्राद्धे ऽधिकारावगमाद
युक्तं । एतच्चौरसविषयमेव । अन्ये त्वनुपनीता एवाधिकारिण इति कात्यायनः॥ "पुत्राभावे क्रमेण स्वकुल
... शिष्यः स्त्रियो वा आचार्यो वा॥ पुत्राणां पूर्वोक्तानां गौणमुख्यानामभावे स्वकुलजाः॥ पौत्रप्रपौत्रा
दयः सपिंडाः॥ सोदकाश्च॥ ... सपिंडाः । सोदकाश्च । शिष्याः । स्त्रियो वा । आचार्यो वा
क्रमेण । पूर्वाभावे उत्तरोत्तर ... श्राद्धविधिं कुर्युः॥ तत्र पुत्राभावे पौत्रः तदभावे प्रपौत्रः॥ पुत्रः पौत्रः प्रपौ
त्रो वा ... इति विष्णुपुराणात्॥ ...
... पुत्रेषु विद्यमानेषु नान्यं वै कारयेत्स्वधा । ... वचनात्॥ नैनं तौ
त्रेण कर्तव्यं पुत्रवांश्चेत्पितामह इति कात्यायनवचनाच्च । क्षेत्रजादि पुत्राणां ... प्रयोजनं तदा मुत्र वद्ग्रहणेन
ते प्राप्तम् ... पौत्रश्च पुत्रिकापुत्रः स्वर्गप्राप्तिकरावुभौ रिक्थे च पिंडदाने च समौ तौ परिकी
र्तिताविति॥ ... पौत्रपुत्रयोः ... अधिकारमात्रप्रतिपादनार्थं ...
... औरसाभावे पुत्रः पौत्रः प्रपौत्रश्च । ... पुत्रिकापुत्र ... दत्तक्रीत ...
... पुत्रः पौत्रः प्रपौत्रश्च पुत्रिकासुत एव चेति । ... प्रपौ

त्रः जायेपत्युः पत्नीपत्याश्च पतिः ॥ तथा च शंखः ॥ पितुः पुत्रेण कर्तव्याः पिंडदानोदकक्रियाः ॥ पुत्राभावे
तु पत्नी स्यात् पत्न्यभावे सहोदरः ॥ भार्या पिंडं पतिर्दद्यात् भर्त्रे भार्या तथैव च ॥ श्वश्र्वादेश्च स्नुषा चैव तदभा
वे सपिंडकः स्मृतः ॥ न भार्याया पतिर्दद्यात् स्वभार्या तथैव च [illegible] पादिलिंगं प्रयोगे पर्यंतं सकृ वार्दि
पर्य । स्वर्गं गतो देहिन्य पः कुर्युः स्वजनैर्लब्ध मंत्रकमिति । मार्कंडेयपुराणे कुल द्वयेपि चेन्नेतुर्भिः कार्या क्रिया
न पतति विष्णुपुराणे वा मृतादि विवाहे तु विधेयं । स्त्रीग्रहणस्यापि क्रियाकर्तृत्व विधानात् । शातातपः ॥ धर्म्ये
विवाहे तु न्यायाः सन्तानात्परिकीर्तिताः । स्त्रीणामधिकारादि लभ्यते वा पत्नी तौ धर्मकर्माणि ॥ अपरकीतावुपानारी सा न पत्न्य
भिधीयते ॥ न सा दैवे न सा पित्र्ये दासीं तां कुनयोऽब्रुवन्निति ॥ असवर्णा विषयमिति शूलपाणिः । अथ च पत्नी अ
पुत्रायाः पत्न्याः पालयंती व्रतं स्थिता । पत्नी देव द्यान्तापिंडं कृत्स्नमंशं लभेत तथैवेति । इह मनु वचने सतानि
र्देशादि नकासंसृष्टस्य पत्न्या एव न ग्रहणाधिकारात् ॥ ः पविभक्तसंसृष्टस्य तु सोदरस्तस्या सापि भागादि
प्रतीयते । तथापि वचनात्सैवात्रोधिदौहित्रा धधिकारिता न वैवं पुनर्यो न विदितस्तदोपि ददयां तदभा ॥ ५५ ॥
क्रियमाने न स्वपित्र्ये तस्य भार्यतः सपिंडदायातिक्रमणं ॥ दुहित्रादिसत्वेपुत्रादीनां मातृधनग्रहणे दु
हितरा भावे पितृ दौहित्राद्यधिकारात् ॥ सर्वसंबंधाभावे च्यापि ते । धिकारप्रतिपादकव्यं । [illegible]
कुर्यो स्तः पविदुपर्यंत पुत्राभावे पत्नी तदभावे गृह [illegible] नदौन र्जवसहते [illegible] । [illegible]
नर्कतनयाद्धये । पश्चाभावे तु कुर्युस्ते अन्यास्ताय तः स्मृतीरिति स्मृति संग्रहपदार्थे तत्र प्रमाणं त्वनो [illegible] । अ
प्रशस्ते वास्मितं दिग्मृता । अथ प्राज्ञा स्तु कानन्म रुते त्वक्रमसहोदराः । पौनर्भवश्चैते पितृरिक्तं शत्रुः स्था

तिन इति । स्मृतिसंग्रह विरुद्ध क्रमाभिधानं च तत्र वचनं तद्वलादन्यत्रवेतौरसादीनां क्रमानिर्देशात्प्रतीयमा
नमपवधानमावश्यं पौर्वापर्यं तु योगाश्च रोक्रमेवयाव्यभिचारिप्रायेण । पत्न्यभावे पुत्रा भावे तु पत्नी स्यात्पत्न्य
भावे तु सोदर इत्यादिवचनेष्वानुपूर्व्याधिकारः प्रतीयते । पुत्रे पुत्रविधया नेषु नान्यं वैकारयेत्स्वधां ॥ अपुत्रस्य तथा पुत्री सा
पिण्डं प्रदद्यादिति । इत्यादिवचने च दुहितुः । अपस्तावात्तावापियं विदेहस्त दशाक्रुतं पौत्रीमातामहस्तेन दद्यात्
पिंडं हरेद्धनमिति इत्यादिलिङ्गाद्दौहित्रस्यात्र ततो व्यवस्था । विभक्तौ मे स्पष्ट पदस्य च नु माने दुहिता पुत्रेऽपि साह
चर्याशांशवचनात् ॥ तद्धनग्रहणे तस्याः धिकारात् । तथा च बृहस्पतिः । भर्तुर्धनहारी पत्नी तं विना दुहिता स्मृता । अंगा
दंगात्संभवति पुत्रवद्दुहिता नृणां ॥ तस्यामात्मनि धनं कस्मात्कथं गृह्णाति मानवः इति । धनग्रहणस्य चोपकार व्याप्त्यावेति
तदर्थहरः सपिंडदाया त्यस्य च विरोधे व्यवस्था । पत्न्यापि अवोक्त नं तं भव स्वेच्छ धनग्रहणे च प [illegible] येति ये
तथापि पिंडदानादौ संस्कृते वाधिकारिणी । दुहिता पुत्रवत्कुर्यान्माता पित्रोस्तु संस्कृतिं । आसौचं स्नातं च पिंडमेवोदिष्ट
सदा तदेवेति तिथिरहादेः स्मरणात् । तदुहित्रभावे दौहित्रः । तदभावे तस्यैव तद्धनग्रहणेऽधिकारात् । अपस्तावादित्यादिम
नुवचनात् अपुत्रपौत्रसंताने दौहित्रा धनमाप्नुयुः । पूर्वेषां तु स्वधाकारे पौत्रा दौहित्रकाम ता इति विष्णुवचने न च तेनस
ह निर्देशात् । तस्यैव दौहित्राभावे माता । पत्नी दुहितरश्चैव पितरौ भ्रातरं तथा तत्सुतो गोत्रजो बंधुः शिष्यः सब्रह्मचारिणः
नग्रहणाधिकार प्रतिपादनात् ॥ स्मृतिसंग्रहे च [illegible] । सुतः कुर्यात्पितुः श्राद्धं पत्नी च तदसन्निधौ ॥ धनहारिणि
दौहित्रस्ततो भ्राता च तत्सुतः इति । पत्नी चेति यथाद्दुहिता ॥ अविभक्तसंसृष्टस्य तु पत्न्यभावे भ्रातैव । तत्र पत्न्यभावे
तु सोदरः सोदर इत्यादि वाक्य प्रसक्ते र प्रसक्तेस्तात ॥ मातादिः सपुत्र [illegible] ॥ आदुर्भ्रातास्तु तयोः कुर्युरिति भार्या देवविधितः । तस्य
भ्रातस्सुतः कुर्याद्यस्य नास्ति सहोदर इति । तत्र सोदरासोदरसमवाये सोदर एव निविर्मितः । तत्रापि प्रेष्ठकनिष्ठसमवाये

कनिष्ठः। नानुग्रहस्य तथाग्रहणात्। संतोपरिष्टिविस्य आनन्त्याद्विशेषेण। [illegible]मासौ कनिष्ठस्याद्येषे ह्यस्य तन्निषेध
कृत्वा त्व। एतत्समस्मज्जिज्ञासा हतस्य यद्योच्छिन्न तेपि तिर्दिष्यात्। तद्धुत्रस्य पिता कुर्यादिद्धस्यादापि विप्रपस्य वचनात्। तदायावि
ग्रे धात्वा ऽधिकार्यं तदाभावदविप्रपसात्। तनिष्ठबहुत्वे प्रथम एवानंतरः। तदभावे तदनंतरः संनिकर्षात्॥ कनिष्ठा
भावेप्पि ज्येष्ठान्नत्वान्निषेधाप्रवर्तनेश्च। यदिस्वे हेन कृष्यतां सपिंडीकरणं विना। यापां कुर्वि श्लेषेण ज्येष्ठा नपि समा
चरेत्। इति ज्योतिपरिशिष्टाच्च॥ ज्येष्ठबहुत्वे प्यनंतरक्रमेण सोदराभावे भिन्नोदरः पूर्ववत्। तस्यापि भिन्नोद्ग
त्वात्। कश्चित्तु इति दृढो हि त्रयो भिन्नगोत्रत्वात् [illegible] दापि गोत्रस्य माहुं कार्यमेव गोत्रजौ रिति च सगोत्र सकृद्भावे
भिन्नगोत्रस्य ग्राह्यत्वानधिकारे कै विभिन्ना संसर्गस्य भ्रातैव कुर्यादिति वदंति॥ तदभावे भ्रातृपुत्रः। भ्राता वा
भ्रातृपुत्रो ति विष्णुपुराणात्। आदि सपुत्राणि महोदरग्रहणं भ्रातृभ्रात्रोपलक्षणं। एवं सामान्येनोक्तेः। सोदरासोदरभ्रा
तृपुत्रादिसमवाये पूर्ववत्॥ भ्रातृपुत्राभावे पितामहो ज्येष्ठापि तानाप्नोतिप्रवेतस्मरणात्॥ दत्तानाम प्यदत्तानां कन्यानां बंधु
मतेपितेति ब्रह्मपुराणाच्च॥ तदभावे माता धनग्रहणे पितरावितिने दर्शनात्॥ असंस्कारस्य तस्यापि कर्तव्यं ब्रह्मचारिणः॥ ६०॥
ब्राह्मादिमातापित्रोस्तत्तु तेषां [illegible]तिस इति ब्रह्मच[illegible]। नववमातानवापि ता कुर्यात् तु त्रस्य पे [illegible]मिति कात्यायन व
चनं [illegible] भ्रातृपुत्रपर्यंत हल्लावेदृश्यं। मातृभावे श्वशुरयोः स्नुषा। श्वश्र्वादेः स्नुषा वै तदभावे सपिंडादिति॥
[illegible]वचनात्॥ स्नुषाभावे भगिनी॥ तत्रानुजाय ज्ञा सोदरा सोदरा समवाये भ्रातृवत्। तदभावे तत्पुत्रः। समवाये तद्ध
व॥ तथा च कात्यायनवचनं॥ अनुपायोद्धा वा पिता हितः कुर्वतिसं क्रियां। तेतां [illegible]सोदरात द्वक्रमेण ते न यस्तस्यापीति
स्मृत[illegible]। भ्राता वा तत्पुत्रश्च पितामहा तान्नापि तथा। ज्ञाति [illegible] सपिंडः सोदकस्तथा। असन्निधाने
सर्वेषा तु तेषां पिंडदः स्मृताः। इति। तदभावे दिग्दयेन न [illegible]। सपिंडः। प्रत्यासन्निक्रमेण। तदभावे सोदकाः॥

स्या पैक्व॥ तथा च विष्णुपुराणे। पुत्रः पौत्रः प्रपौत्रो वा भ्राता वा भ्रातृसंततिः। सपिंडसंततिर्वापि क्रियार्हो नृप जायते॥ एषाम
भावे सर्वेषां समानोदकसंततिः। मातृपक्षस्य पिंडेन संबंधा ये जलेन वा। तदभावे त्रिविधा बांधवाः। गोत्रजा [illegible] तदं
[illegible]त्यादिभ्यः सर्वे तेषां धनग्रहणाधिकारप्रतिप्रदानात्। तत्रापि प्रत्यासन्नेः प्रथमं स्वबंधवः। पश्चात् पितृबंध
वः। पश्चात् मातृबांधव इति क्रमः। तदभावे स्त्री। तत्रापि प्रथमं मासुरादिविवाहोढा सवर्णा। तदभावे पारिणी
ताः सवर्णा। तदभावे [illegible] हत्याति दिक्तेति क्रमः॥ तथा च तत्रैव॥ कृत्वा वपि बोधिनो [illegible]
[illegible] कार्या क्रिया नृपेति॥ कुलहृत्पदेन बांधवानपि गृह्यंते। तेषामपि तत्संबंधात्॥ तदभावे गुरोः शि
ष्यस्तदभावे यजमानस्य ऋत्विक्। तदभावे शिष्य वा स्याचार्यः स ब्रह्मचारी वा॥ पुत्राभावे सपिंडः मातृसपिंडाः
शिष्याश्च दद्युः। तदभावे ऋत्विग्वा [illegible] त्वाचार्य वचनात्। शिष्यानंतरं सब्रह्मचारिणो धनग्रहीतृत्वोक्तेश्च
राजन्य पुरोहितो पंचत्री सप्तक्रमेण। एतेरान्सपिंडोपि निरपत्य पुरोहितः। [illegible] तदशौचं तुती[illegible] पञ्चात्
[illegible] इति ब्रह्मपुराणात्। प्रमीतस्य पितुः पुत्रैः श्राद्धं देयं प्रयत्नतः। ज्ञातिबंधुसुहृच्छिष्यैः ऋत्विक् भ्रस्यपुरोहितैः॥
रिति बृहस्पति वचनात् च। तदभावे जामाता श्वशुरस्य श्वसुरस्य जामातुः। तदभावे [illegible]। तथा च मार्कंडे
यपुराणे [illegible]। तथा पौत्रेश्च सरथादि श्वशुरस्य च। जामाता [illegible]तः कुर्याद्दवि[illegible]पैतृमेधिकामिति। प्राप्त
पि। जामातृश्वशुरश्वके तेषां तेषामपि सं[illegible]यतां इति। यत्तदित्र मार्कंडेयपुराणे [illegible]। पश्चात् जामाता तानिर्दिष्ट
स्ता पापितस्याऽधिकारमात्र प्रतिपादन परत्वात्संबंधवशात् [illegible]। प्रथमं [illegible]प्राप्ते ण। का
लादर्शे [illegible]तिचोक्तं। तदभावे सर्वमार्गता [illegible] विशेष [illegible] तानि तानि दापिका[illegible]तस्य सा[illegible]
येति विष्णुपुराणात्। ब्रह्मसूत्र आहरण धनग्रहणता [illegible]। यदि [illegible]न तावा श्रावणस्य धनग्राहीयः कर्ति

ब्राह्मणः। बन्ध्वाद्यभावे तु सपिण्डनं कार्यमिति विज्ञानेश्वरः॥ ब्राह्मणव्यतिरिक्तानां तु राजा धनं गृहीत्वा तेन धनेनान्येन कारये
त्। उक्तं च बन्धुरहितानां राजा कारयेद्वनापतिरिति विष्णुपुराणात्॥ एतस्य च ब्राह्मणव्यतिरिक्तविषयत्वं तत्रैव राज्ञा ब्राह्मण
धनहारित्वेऽप्युक्तेर्गम्यते॥ राज्ञो ब्राह्मणधनग्रहणानधिकारात्॥ मुमूर्षुणा वा सन्निहिताधिकार्यभावे धर्मपुत्रः कार्यः
सवनस्य मृतस्य सर्वं कुर्यादिति। अपुत्रेण सुतः कार्यो यादृक्तादृक् प्रयत्नतः। पिण्डोदकक्रियाहेतोर्नामसंकीर्तनाय चेति
वचनात्। अत्र चापुत्रग्रहणं संनिहिताधिकारिमात्राभावपरं। पिण्डोदकक्रियाहेतोरित्युक्तत्वात्। स्त्रीणां त्वेषामधिका
रिक्रमे विशेषः। अनूढायाः पिता तदभावे भ्रात्रादिः। ऊढायाः पुत्रः पुत्रिकापुत्राभावे सपत्नीपुत्रः तदभावे
दौहित्राः पौत्राः प्रपौत्राः तदभावे पतिः तदभावे दुहितृदौहित्रौ पुंवत्। तदभावे देवरः [illegible] तदभावे तत्सुतः तद
भावे स्नुषा। तदभावे पितृमातृभ्रातृतत्सुतादयः पूर्वोक्ताः विवाहेन तस्याः पितृगोत्रहानेन पतिगोत्रापत्तेः न कदा
पि सगोत्रापत्याद्यधिकार्यभावे सगोत्रजैरिति विज्ञानेश्वरादिनिबन्धेषु। एते पुत्राद्यधिकारिषु केषां क्रियाकलापः कर्तव्य इति संग्रहे [illegible] ॥६१॥
विष्णुपुराणोक्तं हितं॥ पूर्वाः क्रिया मध्यमाश्च तथा चैवोत्तराः क्रियाः। त्रिप्रकाराः क्रिया ह्येतास्तासां भेदान्शृणुष्व मे।
आदाहाद्वार्षिकाद्यादि यावत् षष्ठं दिनं तावत्क्रियाः। ताः पूर्वा मध्यमा मासि मास्येकोद्दिष्टसंहिताः। प्रेते पितृत्वमापन्ने
सपिण्डीकरणादनु। क्रियन्ते याः क्रियाः पित्र्याः प्रोच्यन्ते ता नृपोत्तराः॥ पितृमातृसपिण्डैस्तु समानसलिलैस्तथा।
संघातान्तर्गतैर्वापि राज्ञा वा धनहारिणा। पूर्वाः क्रियास्तु कर्तव्याः पुत्राद्यैरेव चोत्तराः॥ दौहित्रैर्वा नरव्याघ्र
कार्यास्तत्तनयैस्तथा। मृताहनि च कर्तव्याः स्त्रीणामप्युत्तराः क्रियाः॥ प्रतिसंवत्सरं राजन्नेकोद्दिष्टविधानतः
इति॥ अस्यार्थः। आदिस्यादाहादि द्वादशाहपर्यन्तं सपिण्डनं विहितं तद्दशाहमारभ्य आ [illegible] मध्यमकर्तव्याः क्रियाः।
एकादशाहमारभ्य सपिण्डीकरणपर्यन्ता मध्यमाः। तदूर्ध्वाः सांवत्सरादिकाश्चोत्तराः॥ तत्र सपिण्डादि
भिरपि राजपर्यन्तैः पूर्वाः क्रियाः कार्या एव उत्तरास्तु न कर्तव्याः। मध्यमास्त्वनियमाः। पुत्राद्यैरुत्तरा नियमेनैव दौहि
त्रैस्तत्तनयैर्वा ताः। अन्यथा यथाकर्तव्याः। मात्रादीनां पूर्वमध्यमाः कर्तव्या उत्तराः क्रिया प्रतीतोऽपि प्रतिसंवत्सरमेकोद्दिष्टे
नैव स्त्रीणां तु उत्तराः क्रियाः कार्या न तु पार्वणेन [illegible] तत्र स्त्रीणामेव तासां तत्रैवैकोद्दिष्टविधानमिति पारिजातोक्तेरिति
नुवादः। इदं च वृद्धान्वयप्रकाशे विष्णुपुराणोक्तं। तथापि स्त्रीणां पृथक्पार्वणविधानात् तयोर्विकल्पः इति अपरार्कादयः स्वयं
वदन्ते॥ स्वभर्तृपिण्डमात्राभ्यस्तत्रियास्तां यतः स्मृतेति पार्स्विविच्छेदात्॥ पूर्वमध्यमास्वेकपृथग्भवं सवे॥ अत्र च राजग्रहणं तिरिक्ता
नां तदायधनाभावे पि स्वद्रव्येण पूर्वक्रियासु अधिकारः स इह न दायधनमस्त्येव॥ राज्ञा वा धनहारिणेत्युक्तत्वात्॥ सर्वा
भावे तु नृपतिः कारयेत्तस्य रिक्थतः इति मार्कण्डेयपुराणात्॥ स्वयं तदायधनग्रहणे तु सपिण्डादीनामपि नृपात्तानां
धर्मोत्तराः अपि स्यात् पक्षी। तथा वत्सरे [illegible] पुराणे। मलमेते नानुष्यातो द्रविणं यतस्ततः इति। नदूरस्थं नमलमादतो
ज्ञातीनां हानिनाभ्यर्पति। सपिण्डीसत्स्वदृष्टा निशमिति पादिकीपरा। आदेहपतनात्कुर्यात्तु पिण्डदानो दशक्रि
यादिति॥ पुत्रः पौत्रः प्रपौत्रः पत्नी भ्राता तत्पुत्रमाता पिता दौहित्र स्नुषा। शिष्यालाभे तु तदीयधनाभावे दिक्तराक्रि
यापर्यन्तमावश्यकम्। पुत्राभावे तत्पुत्रः पत्नी माता तथा पिता। बिन्दुभावे च सर्वे संभवः कुर्यात्स्वो धर्ति दृढं गतानि
मार्कण्डेयपुराणात्॥ मृतस्योपि च यः पुत्रः पितुः कुर्यात्क्रियां नृप। तथा मातामहस्यापि दौहित्रः कर्तुमर्हति इति न
भविष्यत्पुराणे। स्त्रीणामप्येवमेव पूर्वादिक्रियाऽभेदेनाधिकारि इति स्वरूपः॥ सपिण्डीकरणं तु तासां पुत्राभावे न
भवति स्मृत्यन्तरे। मार्कण्डेयपुराणे। स्त्रीणामप्येवमेवैतदेकोद्दिष्टमुदाहृतं॥ सपिण्डीकरणं तासां पुत्राभावे न विद्यते
इति॥ हारीतो वदति। पुत्रेषु तु दत्तं सपिण्डीकरणं स्त्रियाः पुत्राभावे तु पत्न्याः पत्या तु भ्रातृपुत्रादपि चैव ये इति। पुत्रग्रहणं
स्मृ१ पत्नीप्राप्त्यन्तराणां॥ अपुत्रायां मृतायां तु पतिः कुर्यात्सपिण्डता। स्वश्वादिभिः सहैवास्याः सपिण्डीकरणं भवेदिति पैठीन

मिवचनात्। सपिंडीकरणाभावेपि चिरत्वाभावाद् पतिपुत्राभावात् स्वर्वैरक्रियालोपे प्रसक्तो पितृत्वाभावेपि एकोद्दिष्ट
विधिनाब्दं वत्सरांते कर्तव्यमित्युक्तं। मार्कंडेयपुराणे। प्रतिसंवत्सरं कार्यमेकोद्दिष्टं नरैः स्त्रियाः। मृताहनि
यथान्यायं नृणां यद्वद्विहितोदितमिति॥ नरैः पतिपुत्रातिरिक्तैः कर्तृत्वेनाधिकृतैः। स्त्रियाः दौहित्रादिभिः। इदं सपि
ंडीकरणाभावे नृणां पुरुषाणां यद्वत्॥ एवं च दर्शे तत्र यथोक्तं प्राहुस्तदनुसरणे मृतादीनां सपिंडीकरणं नाधिका
रित्वं पुरुषाणामपि चिरत्वाभावेपि अब्दं वत्सरमात्रमेकोद्दिष्टविधानेन कर्तव्यमित्युक्तं भवति॥ तथाच॥
मृताहनीत्यादि विष्णुपुराणमप्येतद्विषयतयैव व्याख्यातुं शक्यं। व्याख्यातं तदपि तत्स्पष्टं चोक्तं। प्रत्युक्तं पालि
ताब्दं वत्सरादितावधि वृत्तासपिंडनाभावे एकोद्दिष्टं देयं पितृत्वापत्तिरित्युक्तं। तदप्युक्तं॥ तथा सत्यन्वष्टकादीनामपि
प्राप्तौ पार्वणसंख्या पत्नी तस्य पदस्थितौ नैव दर्शाद्य॥ तस्मात् त्रिवर्षाणां सपिंडीकरणानधिकारिणां पार्वणं सर्वे क्रि
याक्रिया निवृत्तौ प्राप्तायां वार्षिकप्रतिप्रसवमात्रमनेनाक्रियते। न च प्राप्त्यहते कोद्दिष्टे यदि आलस्यादिहतान
सर्वं तातितिमिता सरता दर्शनात् सपिंडीकरणोत्तरभावि एकोद्दिष्टे सपि चिरत्वा पत्न्यानामेव देवतात्वा॥ ६२॥
दृष्टत्वं विना पार्वणैकोद्दिष्टविधानयोर्द्वयोरप्यप्राप्तिर्वचनानुद्वयोरपि प्राप्तिः संभवतीति पार्वणैकोद्दिष्टपा
र्वणं यतिकृते सपिंडीकरणेोरवमवशिष्टमिति वाच्यं॥ असपिंडीकृतानां प्रेतानामेकोद्दिष्टेनैव वर्तेत् यदिति सामा
न्यवचनादेव तत्सिद्धेः॥ अस्य चाब्दं वाक्षरादि कुर्वीतैकोद्दिष्टविधिनाप्युपपन्नौ तद्बाधकत्वेमानाभावादि
त्यादिरन्यत्र विस्तरः॥ ॥ यत्र कुर्यात्प्रथमदिनादिविधिं सोपि तत्रत्यतत्कांत॥ ॥ अग्रे सद्वृति दर्शनात्सर्वमपि
यद्गतिदृश्यं॥ ॥ तथाच॥ यत्रतीर्थादिदेशे यो विप्रः स्वोपि संनिकृष्टः सन्निधानात्प्रथमदिनविधिं पिंडदा
नरूपं कुर्यात्स एवमध्ये सन्निकृष्टसन्निधानेपि अपि दीनात्तन्नैव देशे तत्स्वप्रेतगतिं प्रमुक्तत्वतत्काले स्याशौचे
स्यांतो दशमदिनादि तत्रेतोपस्य पिंडदानं च प्राद्धादिकं शेषं तावत्पर्यंतानि तिपावत विधिं कुर्यात्नान्यः॥

तथाच गरुडपुराणे॥ असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्॥ प्रथमेहनि यो दद्यात्स दशाहं समापयेत् इति॥ अन्यच
भविष्योत्तरे॥ गृहद्वारे श्मशाने च तीर्थे देवगृहे तथा। यत्राद्यो दीयते पिंडस्तत्र सर्वं समापयेदिति॥ अत्र च प
रिभाषितं यद्यपि दद्यादिति सामान्येनोक्तं। तथापि। प्रतिग्रहाभावेपि पिंडकर्मश्राद्धादौ नतु देशे सागमात्रेण
ददातिः। अत्र प्रयोगः संभवात्प्रथमेहनि यो दद्यात्स दशाहं तद्दानं समापयेदिति प्रथमादिनकर्मणा एव दशाहस
माप्य तत्प्रतीते इतिस्पष्टतदसंभवात्॥ प्रथमेहनि यो दद्यात्प्रेतायान्नं समाहितः। अन्नं च वस्त्रं चान्येषु स एव प्रदद्या
त्समापनं। अत्र पुत्रस्तत्र पिंडं दद्यात् द्वितीये चोत्सुकः इत्यन्निष्टस्य प्रथमादिनाद्विधिमित्युक्तं मितान्दतो स्यात्सो
पि च। दिवोदासीये॥ सगोत्रो वासगोत्रो वा योग्निं दद्यात्सखेन वा। सोपि कुर्यात् नवश्राद्धं षडहे च दशमेहनीत्यपि
वचनं लिखितं॥ एकादशाहादिकं तु सन्निकृष्टसन्निधाने सन्निकृष्टे नैव कार्यं अपवादकवचनाभावात्॥ त
स्य स्वरूपेणाभावे असन्निधाने वा पौत्रादिभिः। सपिंडीकरणपर्यंतं स्वस्वकाले वर्षं कर्तव्यं। सपिंडीकरणं तु पुत्रेणैव
तिअसन्निहितेपि ग्राह्यकालमप्यप्रैतं न कर्तव्यं किंतु कालान्तरेपि पुत्रेणैव॥ ॥ तथाच पराशरे वायुपुराणे॥ श्राद्धान्निषो
डशाद्यानि कुर्यात्तानि तु सपिंडनं। प्रोषिते तावत्तिष्ठते पुत्रः कालादपि चिरादपीति॥ अत्र सर्वार्धं सामान्यविषयं। पित्राद्याद्यं
डतरस्य तयमर्थः॥ प्रोषिते न सततवसिते पितरि मरणे कृते सति चिरादपि कालात्पूर्णात् तत्स्वरूपचरमकाल अतिक्रमेपि
पुत्र एव सपिंडनं कुर्यात्नान्यः स्त्रिया जेपि। ऊर्ध्वक्रियास्तु संनिकृष्टस्वरूपाभावाएव विप्रकृष्टैः कार्याः। पूर्वभावप
ति॥ पूर्वस्वरूपाभावो वा भावेव तेषां विधानात्। असन्निधापकपाधिकस्य तापकस्य च सपिंडीकरणपर्यंतं स्यात्
क्रमिकपुत्रादिभिस्तु स्वस्वकाले प्रेतास्तु पात्रासंभवे सर्वं प्रयत्नं कार्यमेव॥ पत्नी च दौ। ब्राह्मणाधिकारसाधारणपदिस्तु
तेः॥ सपिंडनाद्यानां तु प्रभादेरभावे सन्निधानेवा मध्यमाख्यनिषमरूतसंकल्पे इत्यधिकारे ततु विवरणे पितृ विस्तरभया
दुपरम्यते॥ ॥ ६२॥ ॥ अथ वृद्धोक्तिशावत्तमाह॥ ॥ आनान्नः सखानमात्रं नतत्र कृतवहोनामवर्षत्रयं तः शमं नोध्दं

जनिसौ भवत उपरते दंतजे दंते लघुके॥ निस्रौ को नाविशेषात्॥ ॥ नामकरणकालादार्भ्यौ द्वौ वर्षादिनादारभ्या
चौ य दिनमध्य इति यावत्॥ उपरते आजे खननं खननिस्तंभमात्रं कर्तव्यं न तु अनुत्तवकौ दानं चौ॥ न आदिग्रहणं चिन्ह
दानादेरप्युपलक्षणं वस्त्रवर्षः। नामवर्षत्रयं च तथाव तावदिति॥ न तापवर्षपूर्णौ दिति यावत्। अनयोरंतरमध्ये ना
शौ तरसदिनादारभ्य तृतीयवर्षसमाप्तिपर्यंतं उपरते जनकुन वहौ निस्रौ दाताभौ भवत॥ चौ जयुक्ते तूपरते का नावि
शेषात् वर्षत्रयमध्येपि निस्रौ भवतः॥ तथा च मनुः॥ नात्रिवर्षस्य कर्तव्या बांधवैरुदकक्रिया॥ जातदंतस्य वा कुर्यु
र्नाम्नि वापि कृते सतीति॥ आत्रिवर्षस्य असंभावस्ततीयवर्षस्य। आनामकृतेरपि॥ कृत्यौ चेवोदकं कुर्यान्नृणां सं
स्कारमेव च॥ सर्वेषां कृतचूडानामन्यत्रापीछयाद्रयमिति॥ अत्र वै त्रा द्विवर्षनिखनने दिस्रनेन सामान्यप्राप्तौ दाहपक्ष दा
द होनेन द्विवर्षस्य निखनने विहिते। तृतीयवर्षमारभ्य दाहस्यैव प्राप्तौ तृतीयेपि वर्षे मनुवचनेन वैकल्पिके तं निषि
धद्वारा निखनने विहिते तदूर्ध्वं मकृतचूडस्यापि सामान्यप्राप्तौ दाह एव भवति॥ लौगाक्षिवचनेन च सर्वग्रहणादून
द्विवर्षस्यापि कृतचूडस्य निखनन बाधेन दाह एव भवति॥ यत्तु आप्यौ त्रिवर्षस्या प्रविष्टतृतीयवर्षस्य सपिंडोना
मैलोन द्विवर्ष विषयत्वमेव नाग्निवर्षस्ये सादेकं तदयुक्तं॥ अनुशासन योगाद्भूतत्रिवर्षपदायुपपत्तेः॥ ॥६३॥
नास्य कार्योऽग्निसंस्कारो नापि कार्योदकक्रियेति। अनेनैव च द्विवर्षस्य दाहादिनिषेधाद्गौतमवस्य प्रसंगात्॥
अनेनैवाग्निप्राप्ते लक्षं मेधातिथिना। आदंतजन्मना दर्पादय धार्मिवेधे यजति॥ न च न क च्चापि पूर्वजन्मिनो
धानवर्षत्वमिति वाच्यं। ऊनद्विवर्षस्य तदितरस्य च संसर्गेपर्यवद्ध्ये ऊनद्विवर्षस्य यतिखननं पक्षो मुख्यः। तदितर
स्य च दाहपक्षो मुख्य इति। मुख्यानुकल्पत्ववैलक्षण्यमनर्थात्। अत एव च विधि विकल्पो नाम वर्षत्रयातः सामान्यमिति।
विकल्पमात्रमुक्तं। तथापीदृशमुख्यानुकल्पत्वाऽविधानानर्थक्यं॥ तुल्यविकल्पो का शांधि कपे। नचोन द्विवर्षस्यापि

दाहस्यैव मुख्यत्वे सर्वत्र स्यादिति पुनर्निखननविधानं ऊनद्विवर्षग्रहणं चैवमनर्थकं प्रसज्येत॥ अनुपनीतस्य स्पष्टमेवोनद्विवर्षदाह
स्यानुकल्पत्वमुक्तं। अनतीतद्विवर्षस्तु प्रेतो यत्रापि दह्यते। अतिमोहानिमूढैस्तु देशाधर्ममादि वर्ते॥ आ
शौचं ब्राह्मणानां तु त्रिरात्रं तत्र विद्यत इति॥ अत एव च मानवेपि। जातदंतस्य वा कुर्युर्नाम्नि वापि कृते सतीति प्रतिप्रस
वविधिद्वयं जातदंतस्य दाहो अनुकल्पत्वेनानास्त्यंतः अनुकल्प इति पौनरुक्त्येन सार्थकं॥ अन्यथा जातदंतस्या
विसर्गस्यानर्थक्यात्॥ यत्तु सर्वलोके स्त्रीपुंसविषयत्वं प्रतिप्रसवद्वयस्योक्तं॥ तन्मानाभावात्पुंलिंगविरोधाच्चोपेक्ष्यं॥
तस्मान्निखननविधौ दाहादिनिषेधे चौ न द्विवर्षग्रहणमात्रित्वविवक्षितं दर्शनवशात्प्रयोजनांतरार्थं
द्विवर्षस्यापि तृतीयवर्षसमाप्तिपर्यंतं निखननपक्षो न्यून द्विवर्षस्य च द्विवर्षसमाप्तिपर्यंतं दाहपक्षोप्यस्त्येव
विसर्जिते स नामवर्षत्रयांतमित्युक्तं॥ एकाहाश्रौचविधानं उपनद्विवर्षग्रहणं विशेषणमेत्रिर्वैदिकस्यैतद्
वचनविरोधाभावविशेषः। किंतु पूर्वोक्तप्रयोजनार्थमित्युक्तं नतीयप्रतोदे॥ ॥ अथ पितृमुख्यताः स्थापयितो
दर स्नानं गांधावेः शोभयितुं मृतं॥ ॥ पितृमुख्यताः पित्राद्यामतं पुत्रादिस्नापयित्वा अंबरस्त्रगांधैरा
ल्य वस्त्राद्युपस्रुगंधिचूर्णादिभिर्भूषयित्वा पिंडप्रदानहेतु इति शेषः॥ पुत्रमुख्याधिकारित्वाद्दाहदशायां वत
कं नवात् पुत्रमुख्यैरित्युक्तं। पितृग्रहणं बालोपलक्षणार्थं तस्य च तदनभिज्ञात्॥ तथा च यमः॥ प्रेतं दहे
च्छुभैर्गंधैः स्नापितस्रग्विभूषितमिति॥ अर्थैव च आपि॥ स्नानं प्रेतस्य पुत्राद्यैः वस्त्राद्यैः पूजनं ततः। नग्नदे
हं दहेन्नैव किंचिद्देयं परित्यजेदिति॥ किंचिद्देयमिति पार्श्वदेशे वर्तितं कफनादि वस्त्रं प्रदेयं परिस्यजे
दित्यर्थः॥ आदिपुराणेपि। दद्धिर्दोपि न दग्धव्यो नग्नः कस्यांचिदापदि॥ केनापि वस्त्रखंडेन छादितव्यः प्रयत्नतः॥
यत्र तत्र अवच्छुरस्तायदि नग्नः प्रदह्यते॥ नि. ... विद्यतेऽत्र इति॥ ततः शावकादनं च

स्यात् दिनमृतस्य च दाहोत्तरं रात्रौ न कार्यं ॥ तथा च गृह्यान्तरम् ॥ संध्यायां वा तथा रात्रौ दाहः तं कुर्यात् पाये यत्कर्म वा न यत्रा
द्वयोः कर्मणि स्थितं निःफलतां व्रजेत् ॥ इति रात्रिमृतस्य रात्रावेव दाहोऽपि विधीयते पुनर्न प्रातः । न तु यत्र स्मृतिसंग्रहे ॥ रात्रौ
दग्ध्वा तु पिंडांतं कृत्वा वपनवर्जितं ॥ वपनं नेष्यते रात्रौ श्वस्तनो वपनक्रियेति ॥ अथ खनने योग्यमाह ॥ ऊनद्विवर्षं ॥
खनने योग्यं यस्य खननं करिष्यते तं आह ॥ ऊनद्विवर्षं निखनेत् इति शेषः ॥ तथा च यमः ॥ ऊनद्विवार्षि
कं प्रेतं कृत्वा निखनेत् बुधः । यमगाथां गायमानो यमसूक्तमनुस्मरन्निति ॥ गायमानस्तु यमसूक्त
मसृकं तथा गाथा त्र्यहं न औद्धिकाग्नि ना ॥ सदयस्य उपेतस्य इहितान्वा तथा यदिति द्वाह योग्योऽपि
विधानान्निखननं योग्यमात्र । विषयत्वात् सावाकल्येनोक्तः । यद्यपि च खननं तैत्तिरीयके देहशोधनं
तेभ्युदयरूप नयेत्तं येतरं वनमिति वराहपुराणे । दह्यस्यापि हुतस्य क्रियाविहिता तथापि तत्र इत
स्य निरपेक्षसाधनत्वाभावात् इति पाक्षा । इत्थं निखननयोग्यमात्र विषयत्वात्तत्र तदुक्तं ॥ ६४ ॥
॥ २३ ॥ ॥ अथ चतुर्विंशतिवचनमाह ॥ ॥ प्रत्यग्द्वारा नगर्याद्बहिर्वा निर्हरेत् क्षत्रियं तूत्तरेण प्राग्द्वारेण वै
श्यं पित्र्यां दिशा शूद्रं नाय यथा अनुयायुः ॥ व्याख्या : पूर्वमृत्स्य द्विजस्य पुत्रौ तावनुयायिनं नियामतः ॥ ॥ अथ व्याख्या
द्विजं ब्राह्मणं प्रेतं नगर्याः प्रत्यग्द्वारात् पश्चिमद्वारेण । क्षत्रियं तूत्तरेण नगर्या द्वारेण । वैश्यं प्राग्द्वारेण शूद्रं
पित्र्यां दिशि दक्षिणस्यां द्वारेण पुत्रादिभिर्नायित्वा बहिर्निःसार्य सर्वे सपिंडसगोत्रा वयोधिकः वृद्धपूर्वं वृद्धतम
वृद्धतर वृद्धादिक्रमेणोऽनाद्दिवर्षातिरिक्तं प्रेतं निर्यमेनानुयायुरनुगच्छेयुः । ऊनद्विवर्षस्य
त्वपरतोऽनुयाने नियमो वश्य कर्तव्यता नास्ति । प्रेतमुदकदाना यांकर्तव्यं । ... प्रत्यवायो नास्ति

॥ प्राग्द्वारेणेति समस्तमपि द्वारपदं कुत्र्या निष्क्राम्यो न रेणापि वहदिशो स्यात्र संबंधनीयं । तथा च मनुः ॥ दक्षिणेन
मृतं शूद्रं पुरद्वारेण निर्हरेत् ॥ पश्चिमोत्तरपूर्वैस्तु यथायोगं द्विजातयः इति । अत्र यथायोगमित्यनेनोक्तस्य क्रमस्या
नुलोमप्रातिलोम्य विशेषा पेक्षया नुपपत्तिरिति क्रमविवक्षया । नुलोमक्रमस्यैवोपपत्तिर्द्वारेणानुत्तरावधि
